Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Stock Verification-2024

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

पुस्तकालय
रुकुल काँगड़ी विश्वविद्यालय, हरिद्वार
ख्या 661 38111 आगत संख्या 14762
तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन
क पुस्तकालय में वापस आ जानी चाहिए अन्यथा ५० पैसे प्रतिदिन
व से विलम्ब दण्ड लगेगा।

(१०) स्वादगन्—पुण० पु० पा०।

661.38III
14762
Gurukula
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

तृतीये त्वप्रामाणिकश्चाप्य(१)वश्याभ्युपगन्तव्य श्चेति कस्येयमाज्ञेति भवानेव प्रष्टव्यः । व्यवहारस्य स दृढनिरूढत्वादिति चेत्, अप्रामाणिकश्च सुदृढ(निरू ढ)श्चेति व्याघातः । कथञ्चिदपि व्यवस्थितत्वादि चेत्, अप्रामाणिकश्चेन्न कथञ्चिदपि व्यवतिष्ठते । प्राम णिकश्चेत्, तदेवोच्यतामिति वादे व्यवस्था ।

दीधितिः ।

सिद्धाः शब्दाः । द्वितीये त्वाह । अप्रामाणिक इति । प्रमाण विषयार्थक(२) इत्यर्थः । कथञ्चिदिति । सम्वृतिसिद्धत्वा(३ दित्यर्थः । न कथञ्चिदिति । अप्रामाणिकस्य सम्वृति(४)स स्रेणापि वास्तवीकरणायोगादित्यर्थः । तदेव प्रमाणमेव(५) वाद इति । स्ववचनविरोधेऽप्यसिद्धेन हेतुना निर्णयाजननात् वक्ष्यमाणा जल्पादिरीतिरिहापि न निवार्यत इति तात्पर्यम् ॥

दीधितिटिप्पणी ।

रूपप्रमाणविषयत्वादर्थघटितं तदाह । प्रमाणाविषयेति । सम्वृतिः सत्ख्यातिः । तत्त्वबुभुत्सोः कथा वादः । स्ववचनेति । स्ववचनविरो धेऽपि स्वरूपासिद्धेन हेतुना भवता साधयितुं न शक्यत इ भावः । ननु जल्पवितण्डयोरित्यादिना यद्वक्ष्यति, तदपि वक्ष पार्यते, तथा च वादे तस्यानुक्तौ न्यूनता स्यादतः, वक्ष्यमाणेति तथा च तदन्यत्र बोध्यमिति ॥

(१) त्वप्रामाणिक अ- पुण० पु० पा० । (२) प्रमाणविषयार्थकभिन्न इत्यर्थः ।
(३) संवृतिसिद्धत्वादिति । अस्य तदर्थस्येत्यादिः ।—गुणानन्दः ।
(४) सवृति—कलि० मु० पु० पा० ।
(५) तद्धितार्थविशेषणप्रमाणशब्दानुकर्षस्यास्पष्टत्वादाह । प्रमाणमेवेति—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

कल्पलता ।

अभ्युपगन्तव्यश्चेति । अभ्युपगमस्य प्रमाणमूलक-
वस्थिते(१)रित्यर्थः । नन्वभ्युपगमे न प्रमाणमूलत्वं(२)
न्त्रम्, किन्तु निश्चयमूलत्वमात्रम्, निश्चयश्चास-
ख्यातिरूपोऽपि, ततस्तदधीनो(३) व्यवहारोपि प्रकृते
यादित्याह । व्यवहारस्येति । (अत्र) विरोधमाह(४)।
प्रामाणिकश्चेति । सुदृढत्वम् असङ्गृहीत(५)संवाद-
वम् ?। निरूढत्वम् इदमित्थमेवेतिगृहीतप्रामाण्यत्वम् ।
थञ्चिदिति ।(६) सम्भूतिसिद्धत्वेनेत्यर्थः । अप्रामाणि-
श्चेदिति । सम्भूतिरप्रमैव चेत्, तदा तन्मूलोऽपि व्य-
हारः कथं व्यवतिष्ठताम् । प्रमारूपैव चेत् संभूतिः,
दा तन्मूलं प्रमाणमेवोच्यताम्, तच्च(७) नास्तीति
ावः । ननु जल्पवितण्डयोः परपरा(८)जयार्थमप्रमा-
नापि व्यवह्रियत एव, तत्कथं व्याघात इत्यत
ाह । वाद इति । वाद एव त्वया सहायमुपक्रान्तः
स्थिरं वा चिरं(९) क्षणिकं वेति तत्त्वनिर्णीषया, तत्र
थमप्रमाणेन व्यवहरिष्यसीत्यर्थः । यद्वा वादकथा-
ां स्ववचनविरोधो न निग्रहस्थानम्, नाप्यप्रतिभा,
ं तु न्यूनाधिकापसिद्धान्त(१०)हेत्वाभासपञ्चका-
ामेव तत्रोद्भावनीयत्वादित्यर्थः ॥

---

(१) मूलकत्वमस्ति ते-पा० २ पु० ।
(२) नन्वभ्युपगमे प्रमामूलत्वं न-कालि० मु० पु० पा० । नन्वभ्युपगमे मूलत्वं न-पा० २ पु० ।
(३) श्चासत्ख्यातिरूपोपि, यतस्तदधीनो-पा० २ पु० । (४) दित्याह-पा० २ पु० ।
(५) असद्गृहीत—पुण० पु० पा० । (६) कथञ्चित् —पा० २ पु० ।
(७) तत्तु-पुण० पु० पा० । (८) परस्पर-कालि० मु० पु० पा० ।
(९) वा चिरं—पुण० पु० पा० । (१०) पसिद्धान्त —कालि० मु० पु० पा० ।

661,38III
14762

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

जल्पवितण्डयोस्तु पक्षादिषु प्रमाणप्रश्नमात्रप्र
ऽस्तस्य न स्ववचनविरोधः, तत्र प्रमाणेनोत्तरमानिष्टमश
क्यं च । अप्रमाणेनैव तूत्तरे(१) स्ववचनेनैव भङ्ग
मदुक्तेषु पक्षादिषु प्रमाणं नास्तीति स्वयमेव स्वीकारात्
अनुत्तरे त्वप्रतिभैवेति ।

दीधितिः ।

जल्पेति । शशशृङ्गादिशब्दा हि पदविधया(२) नार्थभेदबोधक
असामयिकत्वात्(३), वाक्यविधया(४) तु तथात्वे(५) शृङ्ग
शशादिसंसर्गं बोधयेरन्, तथा च नित्यः शब्द इत्यत्र श
नित्यत्व(६) इव शृङ्गादौ शशादिसंसर्गे प्रमाणप्रश्नो न ऽस्परा
हन्यत इति भावः । अनिष्टम्, प्रकृत(७)पक्षादेः प्रामाणि
त्वानभ्युपगमात् । अशक्यम्, शृङ्गादौ शशादिसंसर्ग(८
साधकप्रमाणाभावात् ॥

दीधितिटिप्पणी ।

पदविधयेति । तथा चाखण्डं शशशृङ्गपदं यदि रूढ्केतितं स्यात्
तदा शशशृङ्गं नास्तीति मयोच्यमानेऽखण्डाप्रसिद्ध्या मम स्व
चनविरोधः स्यात्, न चैवम् । प्रश्नः, नैयायिकस्य ॥

कल्पलता ।

ननु न त्वया सम्मं तत्त्वनिर्णयार्थमहं प्रवृत्त
किन्तु विजयार्थमेव, तत्र च स्ववचनविरोधेनाप्रति

---

(१) माणेनोत्तरे-पुण० पु० पा० । (२) पदविषया—कलि० मु० पु० पा० ।
(३) अर्थासामयिकत्वात्—पुण० पु० पा० । असामयिकत्वात्, असङ्केतितत्वात् । इद
लक्षणम् । विशिष्टे सङ्केतेपि विभज्य प्रश्नसम्भवो बोध्यः ।—गुणानन्दः ।
(४) वाक्यविषया—कलि० मु० पु० पा० । (५) विधया तथात्वे च—पुण० पु० प
(६) शब्दनित्यत्व—पुण० पु० पा० ।
(७) हेत्वाकाङ्क्षायामुभयत्र हेतू पूरयति । प्रकृतेति ।—गुणानन्दः ।
(८) शृङ्गादौ संसर्ग—कलि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

कल्पलता।

या वा निगृहीत एवास्मीत्यत आह। जल्पेति। अ-
ष्टमिति। शशविषाणादेरपि प्रामाणिकत्वप्रसङ्गा-
त्यर्थः। तत्र च(१) स्ववचनविरोधमङ्गीकृत्यापि प्र-
णमवश्यं प्रष्टव्योसि, तत्र चोत्तरानुत्तरयोस्त्वमेव
ग्राह्य इत्यर्थः। एतदेवाह। मदुक्तेष्विति(२)॥

यदि च व्यवहारस्वीकारे विरोधपरिहारः स्यात्,
सौ स्वीक्रियेतापि, न त्वेवम्, न खलु सकलव्यव-
राभाजनं च तन्निषेधव्यवहारभाजनं चेति वचनं
न परस्परमविरोधि।

दीधितिः।

व्यवहाराभाजनत्वेन स्वयम(३)भ्युपगते अलीके क्रमा-
भावं(४) व्यवहरता(५) त्वयापि स्ववचनविरोधः स्वहस्तित
इत्याह। यदि चेति॥

कल्पलता।

नन्वलीके स्ववचनविरोधभयेन मूकत्वमङ्गीकृत्या-
तिभा स्वीकृता, व्यवहार एव कथं तत्र नाङ्गीकृत(६)
इत आह। यदि चेति। सकलविधिनिषेध-
व्यवहाराभाजनेऽलीके(७) व्यवहारस्वीकारेऽपि वि-
रोधस्य तादवस्थ्यादित्यर्थः। एतदेवाह। न खल्विति॥

(१) दित्यर्थः। तेन—कलि० मु० पु० पा०।
(२) मदुक्तेरिति—पुण० पु० पा०। यदुक्तमिति—पा० २ पु०।
(३) स्वयम्, बौद्धेन।—गुणानन्दः। (४) क्रमाभाव—कलि० मु० पु० पा०।
(५) व्यवहारता—कलि० मु० पु० पा०।
(६) व्यवहार एव तत्र कथं न स्वीकृत-पा० २ पु०। (७) ऽलीक-कलि० मु० पु० पा०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधिव्यवहारमात्राभिप्रायेणाभाजनत्ववादे कृत्यवहत
विरोध इति चेत, हन्त, सकलविधिनिषेधव्यवहारोऽपि वि
जनत्वेन किञ्चिद् व्यवह्रियते न(१) वा, उभयथापि व्यवहार
वचनविरोधः, उभयथाऽप्यवस्तुनैव तेन भवितव्यम्,
स्तुनः सर्वव्यवहारविरहानुपपत्तेः। नेति पक्षे सकल
धिनिषेधव्यवहारविरहीत्यनेनैव व्यवहारेण विरोधा

दीधितिः।

विविध(२)विधिव्यवहाराभाजनत्वमेवावस्तुनो वयम
पगच्छाम इत्याशङ्कते। विधीति। तेनेति। सकल(३)व्यव
राभाजनेनेत्यर्थः। उभयथा(४) विरोधं व्युत्पादयति, ने
त्यादि(ना)। सकलेति। सकलव्यवहारशून्यत्वं यत्र प्रतीतं(
तत्रैव तद्व्यवहारात् कथं सर्वत्र तद्व्यवहारनिषेधः। अथ न कथ्यते,
तत्प्रतीतं तदा तद्व्यवहारस्या(६)प्यप्रत्ययात् कथं निषेध इत्यत

दीधितिटिप्पणी।

मूले नेतीत्यर्थेऽसङ्गतम्, नेति पक्षे तादृशव्यवहारस्यानङ्गी
रात्, अतः प्रतियोगिप्रसिद्धिरूपतया व्यवहारं सङ्गमयति।
लेति। नन्वेवमलीके प्रतियोगिप्रसिद्ध्याऽन्यत्रानलीके(७) नि
भविष्यतीत्याह। सर्वत्रेति। ज्ञानमात्रादेवाभावग्रहणे न(८) व्यवति

(१) भाजनत्वेन व्यवह्रियते किञ्चिन्न–पुण० पु० पा०।
(२) विविधेति सामान्याभावस्फोरणाय।–गुणानन्दः।
(३) विरोधानुकर्षणभ्रमं निराकरोति। सकलेति।–गुणानन्दः।
(४) विप्रकृष्टत्वात् स्पष्टयति। उभयथेति।–गुणानन्दः।
(५) यत्र प्रतीतमिति व्यवहारेपि सामग्रीविघटनपरम्।–गुणानन्दः।
(६) तद्व्यवहारस्य, सकलव्यवहारशून्यत्वव्यवहारस्य। अप्रत्ययादिति। तादृशव्यवहर्त्त
नाभावेन तादृशव्यवहाराभावे तस्य प्रत्यक्षं न स्यात्, प्रत्यक्षाभावे परोक्षमपि न स्यादिति भा
(७) न्यत्र कालिकेन–पा० २ पु०। आदर्शपुस्तकेप्ययमेव पाठः।
(८) ग्रहणे तु–इत्यादर्शपुस्तकद्वितीयपुस्तकयोः पाठः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृव्यवहृतस्य निषेद्धुमशक्यत्वात्। व्यवह्रियत इति प-
हाराऽपि विषयस्वरूपपर्यालोचनयैव विरोधात्, न हि स-
ापि व्यवहाराविषयश्च व्यवह्रियते चेति।

दीधितिः।

। अव्यवहृतस्येति। अज्ञातस्येत्यर्थः(१)। विषयेति।
ळव्यवहाराभाजनस्य व्यवहाराभावव्यवहाराभ्युपगमादि-
धः। तदेवाह(२)। न हीति॥

दीधितिटिप्पणी।

क्षेत्यत आह। अज्ञातस्येति। सकलेति। तादृशव्यवहाराभाजन-
। व्यवह्रियत इत्यस्य तादृशव्यवहाराभाववत्त्वेन व्यवह्रियत इत्य-
तयाऽभावव्यवहारमादायैव विरोधादित्यर्थः॥

कल्पलता।

ननु येन सकलव्यवहाराभाजनत्वमलीकस्याङ्गी-
क्रियते, तस्य तव (निषेधव्यवहारं मया क्रियमाणं) नि-
षेध इत्यतः(३) स्यात् स्ववचनविरोधः, मया तु विधिव्य-
हाराभाजनत्वमात्रमङ्गीक्रियते (तत्र), तथा च
त्वक्षणिकत्वादिनिषेधव्यवहारं कुर्वतो मम कुतः
वचनविरोध इत्याह। विधीति। विधिव्यवहारमा-
त्रेति वदता त्वया विधिनिषेधोभयव्यवहाराभाज-
त्वेन (न) किञ्चिदङ्गीक्रियत इति मात्रपदस्वरसात् प्र-
यते(४), तथा च तावतापि तव स्ववचनविरोध एवे-

(१) निषेधज्ञाने व्यवहारस्याप्रयोजकत्वादाह। अज्ञातस्येति।—गुणानन्दः।

(२) पौनरुक्त्यमाशङ्क्याह। तदेवेति। विरोधस्वरूपमेव स्पष्टयतीत्यर्थः।—गुणानन्दः।

(३) इदमेव युक्तम्। तस्य तव निषेधव्यवहारं क्रियमाणं निषेधः—पा० २ पु०। तस्य तव व्यवहारं मया क्रियमाणं निषेधः—कलि० मु० पु० पा०। तस्य तव निषेधतः—पुण० पु० पा०।

(४) त्वया विधिनिषेधव्यवहाराभाजनत्वेन न किञ्चिदङ्गीकरोमीति मात्रपदस्वरसः। तथा ते—कलि० मु० पु० पा०।

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

ति विकल्पतो(१) दर्शयति । हन्तेति । उभयथेति
व्यवहाराव्यवहारयोरित्यर्थः । उभयथापीति । सक
विधिनिषेधव्यवहाराभाजनत्वव्यवहारो यस्मिन्(
धर्मिणि तदवस्तु कथं न स्यात्, (यदि च सक
व्यवहाराभाजनत्वेन(३) व्यवह्रियते तदा सकल
वहाराभाजनत्वं(४) क्वापि प्रसिद्धं प्रतिषिध्येत, त
च यत्र प्रतीतं तदेवावस्तु कथं न स्यादित्यर्थः ।)
उभयमभिप्रेत्याह । वस्तुन इति । नेति पक्ष इति
विधिनिषेधव्यवहारविरहितवस्य निषेधस्य प्रतीत
तदाश्रयप्रतीतेरावश्यकत्वात्, तच्चालीकमेवेत्यर्थ
अव्यवहृतस्येति । अप्रतीतस्येत्यर्थः । व्यवह्रियत इति
सकलविधिनिषेधव्यवहाराभाजनं च व्यवह्रियते च
विषयस्वरूपमेव तथोपास्थितम्, येन स्फुटतरः स्ववच
विरोध इत्यर्थः । एतदेवाह । न हीति ॥

यदि चावस्तुनो निषेधव्यवहारगोचरत्वं, विधिव

दीधितिः ।

नन्वयं प्रश्नो भवतोऽपि दुरुत्तर इत्यत आह । यदि

दीधितिटिप्पणी ।

इत्यत आह यदि चेतीति । तथा च तद्दोषमुपेक्ष्यायं दोषो

---

(१) विकल्प्यते ।-कलि० मु० पु० पा० । विकाल्पितो-पा० २ पु० ।

(२) यत्र—कलि० मु० पु० पा० ।

(३) इदमेव युक्तम् । सकलव्यवहारभाजनं-पुरा० पु० पा० । सकलव्यवहाराभाजन कलि० मु० पु० पा० ।

(४) सकलव्यवहारभाजनत्वं-कलि० मु० पु० पा० ।

(५) यदि चेत्यारभ्य न स्यादित्यर्थ इत्यन्ता कुण्डलीस्था फक्किका २ पु० नास्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

ारगोचरतापि किं न स्यात्, प्रमाणाभावस्योभयत्रापि यत्वात् । वन्ध्या(१)सुतस्यावक्तृत्वेऽचेतनत्वा-कमेव प्रमाणम्, वक्तृत्वे तु न किञ्चिदि(२)ति । तत्रापि सुतत्वस्य विद्यमानत्वात् । न हि व-ध्यायाः सुतो न सुतः, तथा सति स्ववचनविरोधात्(३)। नमात्र(४)मेवैतत्(५), न तु परमार्थतः सुत एवासा-

दीधितिः ।

। उभयत्र निषेधे विधौ च । निषेधे प्रमाणमाशङ्कते । येति । प्रमाणप्रवृत्तावलीकत्वानुपपत्तौ सत्यामेवाह । तत्रा-ति । वक्तृत्वं वचनकरणयोग्यता(६) मूकस्यापि, मूकत्ववि-

दीधितिटिप्पणी ।

भावः ।(७) तत्रापीति मूलम्, तत्रापि सुतत्वस्य प्रमाणस्य मानत्वात्, तथा च वक्तृत्वे तु न किञ्चिदिति यदुक्तं तदनुपपन्न-यर्थः। नन्विदं भवतो नैयायिकस्यानुक्तिसम्भावितम्, न हि भवता ीके (सु)तत्वादिकं वर्तत इत्यङ्गीक्रियते इत्यत आह । प्रमाण-त्ताविति । तथा च एतद्दोषसत्त्वेपि दोषान्तरमाहेत्यर्थः । नन्विदं त्वं मूक एव वक्तृत्वव्यभिचारीत्यत आह । वक्तृत्वमिति ।

(१) तुल्यत्वात् । अथ वन्ध्या--पुण० पु० पा० ।

(२) किञ्चिदपी-पुण० पु० पा० । (३) विरोधाद्-कलि० मु० पु० पा० ।

(४) वचनमात्रम्, निरर्थकं वचनम् । एतत्, वन्ध्यासुत इति । अचैतन्यस्यापि, अचैतन्य-ादकत्वेनाभिमतस्यापि । एवंरूपत्वात्, निरर्थकत्वात् । चेतनादिति । चेतनावृत्तिधर्मवद्विशे-वहाराभाजयर्थः ।

(५) मेव तत्-पुण० पु० पा० । (६) योग्यता ।-कलि० मु० पु० पा० ।

(७) सुतत्वे वक्तृत्वे चेति प्रत्येकं वक्ष्यमाणत्वात्तथैव व्याचष्टे । उभयत्रेति । निषेध इति । नास्ति । द्वार इति शेषः ।--पा० २ पु० ।

विति चेन्न । अचैतन्यस्याप्येवंरूपत्वात्, चेतनाद
स्वभावान्तरमेव ह्यचेतनमित्युच्यते । चैतन्यनिवृत्तिरस्वभ
त्रमेवेह विवक्षितम्(१), तच्च सम्भवत्येवेति चेन्न । त
प्यसुतत्वनिवृत्तिमात्रस्यैव(२) विवक्षितत्वात् ।

दीधितिः ।

रहेण वा सुतत्वं विशेष्यम्, मूकत्वस्य(३) तत्त्व(४)विशेपत्वा
वचनस्योपलक्षणतया क्रियान्तरकर्तृत्वे वा तात्पर्य
अचैतन्यं हि चेतनभिन्नधर्मो(६) वा चैतन्यविरहो वा,
आह । चेतनादिति । द्वितीयं शङ्कते । चैतन्येति । असुत

दीधितिटिप्पणी ।

तत्त्वेति । तत्त्वविशेषत्वात् अर्थक्रियाविशेषत्वात् । तथा च व
वक्तृवचनं क्रियान्तरकर्तृत्वस्याप्युपलक्षणं, तदादायैव मूकेपि स
मस्तीति न मूकत्वविरहितत्वविशेषणमिति भावः(७) । चेतनभि
चेतनभिन्नस्य धर्मिणः । असुतत्वस्य सुतभेदस्य वन्ध्यासुतेपि भ
कथं तत्र निवृत्तिरतः स्वभावगर्भितं कृत्वा विशिष्टाभावं दर्श
असुतत्वमिति । स्वभावानादरे तत्र विशिष्टाभाव इत्यर्थः, सत प

(१) मात्रमेव विवक्षितमिह–पुण० पु० पा० । (२) मात्रस्य–पुण० पु० पा०

(३) ननु मूकत्वं वचनाकर्तृत्वम्, तद्विरहश्च वचनकर्तृत्वम्, तथा च साध्याविशेष ङ्क्याह । मूकत्वस्येति । वचनाकर्तृत्वस्य घटादिसाधारण्येन वचनाकर्तृत्वे सति चेतनत्वमेव व्यम्, तदभावो विशिष्टाभावोऽखण्डो न वचनकर्तृत्वमिति भावः । तत्त्वविशेषत्वादिति । चे तत्त्वेन विशेषितत्वादित्यर्थ इति कश्चित् । वस्तुतस्तु अचैतन्यमिव वचनाकर्तृत्वमपि वन्ध्यासु वेति तद्विरहस्य तत्रासिद्धिरित्याशङ्क्याह । मूकस्येति । तद्विशेषत्वात्, परमार्थसद्विशेषत्वात् वन्ध्यासुतस्तथेति भावः । स्वनये पारमार्थिकत्वस्य व्यावर्त्याप्रसिद्धेराह ! वचनस्येति ।—गुण

(४) टिप्पणीकृन्मतानुसारेण मूकत्वस्य तत्त्वविशेषत्वादिति ग्रन्थेन सहाग्रिमग्रन्थस्यैकवा गुणानन्दमते तु पूर्वग्रन्थस्येति विशेषः सूक्ष्मदर्शिभिश्चिन्त्यः ।

(५) तद्विशेषत्वात्–कालि० मु० पु० पा० । (६) भिन्नत्वं—पुण० पु० पा०

(७) व्याख्या च वर्गत्वे बहुवचनं क्रियतेकर्तृत्वस्याप्युपलक्षणं तदायैकमुकोपसाध्यम मृकत्वविहितविशेषणमिति भावः ।—इत्यादर्शपुस्तके पाठः । संख्या च बहुत्वे बहुवाक्यं कर्तृत्वस्याप्युपलच्चणं तदादायैवमूकेपिसाध्यमस्तीतिनमूकत्वाहितविशेषणमिति भावः ।–पा०

(८) इत्यर्थमतः–पा० २ पु० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिः ।

निवृत्तिरस्वभावत्वम्, तन्निवृत्तिरसति निःस्वभावे न विरुध्यत
। त भावः(१) ॥

दीधितिटिप्पणी ।

प्रति सामर्थ्यादिति भावः ॥

कल्पलता ।

यथा(२) चालीके(३) सत्त्वं क्षणिकत्वं च व्याति-
सिद्ध्यर्थं निषि(४)ध्यते, तथा तयोर्विधिरेव कथं
क्रियते, विधिवन्निषेधस्यापि प्रमाणाधीनत्वात् ।
षेधव्यवहारे प्रमाणं शङ्कते । वन्ध्यासुतस्येति ।
त्राश्रयासिद्धिः स्वरूपासिद्धिश्च द्वयोरपि प्रमाणा-
षयत्वादिति यद्यपि, तथापि पर(५)परिहासाय
प्रतिपत्तिमाह । तत्रापीति । वक्तृत्वेपीत्यर्थः । स्व-
पासिद्धिं निरस्यति । न हीति । तथा सतीति ।
सुतत्वे सतीत्यर्थः । वन्ध्यासुतो न वक्तीति वदता
येव तत्सुतत्वाभ्यु(६)पगमादिति भावः । वचन-
त्रमिति । अर्थशून्यमित्यर्थः, त्वया तु साधनत्वे-
पात्तं सुतत्वं(७) न वचनमात्रं भवितुमर्हतीति
स्वरूपासिद्धिरिति भावः । पर्युदासाभिप्रायेणाह ।
चैतन्यस्यापीति । पर्युदासमेव विवृणोति । चेतना-
ति । तथा च तवापि(८) स्वरूपासिद्धिरेवेति भावः ।
सज्यप्रतिषेधाभिप्रायेण शङ्कते । चैतन्येति । तथा

---

(१) विरुध्यते—पुण० पु० पा० ।
(२) अयं ग्रन्थोऽधृत्वेव प्रतीकं यदि चेत्यादिमूलस्य व्याख्याने प्रवृत्त इति बोध्यम् ।
(३) थालीके—पा० २ पु० । (४) निषे—कालि० मु० पु० पा० ।
(५) तथापि--पा० २ पु० । (६) तत्सुतत्वाद्यु—पा० २ पु० ।
(७) सुतरां —कालि० मु० पु० पा० । (८) तथा च-पा० २ पु० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

कल्पलता ।

चाभावस्यापि तुच्छत्वात्तुच्छे(१) च तत्सम्भवान्न
रूपासिद्धिरिति भावः । तत्रापीति । अस्मत्प्रयो
ऽपीत्यर्थः । त्वन्मतेऽन्यापोह(२)स्यैव पदार्थत्वा(३)
ति भावः ॥

असुतत्वनिवृत्तिमात्रस्य स्वरूपेण कृतिज्ञप्त्यो
सामर्थ्ये समर्थमर्थान्तरमध्यवसेय(४)मनन्तर्भाव्य कु

दीधितिः ।

असुतत्वेति । निवृत्ते(५)स्तुच्छत्वादिति भावः । स्वरूपात्म
स्वतः(६) । कृतिर्वचनस्य । ज्ञप्तिर्वक्तृत्वस्य(७) । अवसेयम्
रिचेयम्(८) । अवसायजनकं निर्विकल्पकं वात्रावसायः(
तद्विषयं स्वलक्षणम् । स्वलक्षणमपि सविकल्पकाविषय इति
नेदमित्यपि कश्चित् । वन्ध्यासुतस्त्वलीकत्वादसमर्थ इति भाव

दीधितिटिप्पणी ।

परिचेयमिति । निर्विकल्पकविषय इत्यर्थः । अवसेयपद एव शक्ध
स्बन्धं दर्शयित्वा लक्षणामाह । अवसायेति । इयप्रत्ययार्थमाह । त
षय इति(१०) । स्वलक्षणम् पारमार्थिकं वस्तु । अध्यवसेयपदं निरर्थ

---

(१) तुच्छत्वातुच्छत्वे-कलि० मु० पु० पा० । (२) न्यायोह—पाठः ।

(३) स्यैवा—कलि० मु० पु० पा० । (४) मवसेयमिति पाठो दीधितिकृत्सम्म

(५) असामर्थ्ये हेतुमाह । निवृत्तेरिति ।—गुणानन्दः ।

(६) स्वस्य रूपमित्यर्थभ्रमं निराकरोति । स्वत इति । हेतुत्वामित्यस्य हेतुतानिरूपकत्वमित
तथा च परमार्थसन्निष्ठहेतुतायास्तदवच्छेदकं वाच्यम्, न च वन्ध्यासुतः समर्थ इति भावः
गुणानन्दः ।

(७) ज्ञप्तिर्वचनस्य—पुण० पु० पा० ।

(८) अवसायपदस्य सविकल्पकपरत्वे परमार्थसतस्तद्विषयत्वासम्भवादसङ्गतेराह । परिचे
त्यादि । अवसायजनकमिति । कारणे कार्योपचारादिति भावः ।—गुणानन्दः ।

(९) निर्विकल्पकं वा । अत्रावसायः—कलि० मु० पु० पा० । निर्विकल्पकं चात्रावसाय
पुण० पु० पा० ।

(१०) तद्विषयामिति—इति पाठो दीधित्यनुरोधादपेक्षितः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

त्वमिति चेन्न। अचैतन्येऽप्यस्य न्यायस्य समानत्वात्।
व्यावृत्तिरूपमपि तदेव गमकं यदतस्मादेव, यथा शिंश-

दीधितिः।

ष न्यायस्य तुच्छत्वेनासमर्थतया ज्ञप्तिजनकत्वविरहस्य।
प्यते च(१) वन्ध्यासुतादेरप्यसामर्थ्ये प्रमाणाभावः।
शङ्कते। व्यावृत्तीति। सैव व्यावृत्तिस्तद्धर्मावलीढस्य धर्म
यति या तद्धर्मशून्यत्वावच्छिन्नाद्व्यावृत्ते(२) तद्धर्मावच्छि-
न्ना(३)द्व्यावृत्ते वर्तते, यथा(४) शिंशपात्वमशिंशपानात्मनि
शपात्मनि वर्त्तमानं शिंशपाधर्मं वृक्षत्वम्। अत्रैवकारबललभ्ये

दीधितिटिप्पणी।

यस्वरसः कश्चिन्मते। न च भवन्मते समर्थपदेनैव तद्वारणे तत्पदं
र्थकमिति वाच्यम्। समर्थ एव क इत्याकाङ्क्षायामेतत्पददानात्।
ते चेति। तथा च ममासंमततया कृतिज्ञप्त्योरि(५)त्यादिदूषण-
नास्तीति भावः। व्यावृत्तिरूपमित्यादि मूलं न सङ्गतम्, प्रकृते-
तत्वनिवृत्तिरूपा(६) व्यावृत्तिरसुतत्वावच्छिन्नाद्व्यावर्त्तत एव, त-
हेतूकरणात्, वन्ध्या(सुत)प्रदर्शनमपि न सङ्गतम्, तस्याहेतू-
तणात्, इत्यत आह। सैवेति(७)। तद्धर्मावच्छिन्नाच्चेति(८) वास्तव-
द्दलद्वयमस्तीति लिखितम्। वस्तुतः पुनरन्त्यदलस्य वैयर्थ्यमेव,
एवाह। अत्रैवकारेत्यादि। [लक्षणत्वमिति साधयति। इतीति।
वन्ध्यात्वरूपसाध्यतदभाववन्ध्यावृत्तिकस्य च दर्शयितुमुचि-
तात्। न तु तदुत्तरतदभावव्यावृत्तत्वस्य हेतुत्वमिति भावः।
न्वयि। न चेति। न वेत्यर्थः। तथा च तद्दृष्टान्तेन वक्तृत्व-

(१) सोयं केवलैरेव वचनैरित्याद्यग्रिमग्रन्थे। असामर्थ्ये, तुच्छत्वे।
(२) च्छिन्नाद्व्यावृत्ते-कालि० मु० पु० पा०।
(३) च्छिन्नाद्व्या-कालि० मु० पु० पा०। (४) वर्त्तते, तथा—कालि० मु० पु० पा०।
(५) तथा चासमर्थतया प्रतिज्ञास्ती-इत्यादर्शपुस्तके पाठः।
(६) प्रकृतेऽर्थत अव्युत्पत्तिरूपा-इत्यादर्शपुस्तके पाठः।
(७) इत्यादिदोष इत्येवेति-पा० २ पु०। इत्यादिदोषहनैवामिति—इत्यादर्शपुस्तके पाठः।
(८) तद्धर्मावच्छिन्नेतिमथ—पा० २ पु०। आदर्शपुस्तकेऽप्ययमेव पाठः।

Digitized by Arya Samaj Foundation Chennai and eGangotri

पात्वम्, वन्ध्यासुत(१)स्त्वसुतादिव घटादेः(२) सुता
देवदत्तादेर्व्यावर्तते, अतो न हेतुरिति चेत्, नन्वचैतः
मेवंरूपमेव(३), न हि वन्ध्यासुतश्चेतनादिव देवद

दीधितिः ।

तद्धर्मावलीढमात्रवृत्तित्वे(४) तात्पर्यम् । वन्ध्यासुतस्तु सु
सुतोभयव्यावृत्तोऽतो न तद्वृत्तिरसुतत्वनिवृत्तिः सुतधर्मस्य
धिका(५) । न च यैवासुतमात्रव्यावृत्तमैत्रादिवृत्तिरसुतत्वा
त्तिः सैव वन्ध्यासुतेऽपीति वाच्यम् । सदसतोरेकधर्मवत्त्वा
गात् । याऽतन्मात्र(६)व्यावृत्ते(७) पक्षे वर्त्तत इति वा
तथा चा(८)तन्मात्रव्यावृत्तपक्षधर्मतासरूपस्यैव व्यावृत्तिर्ग
ति फलितार्थः । सैव व्यावृत्तिर्गमिका, याऽतस्मादेव विपक्ष
व्यावर्तते, वन्ध्यासुतस्तु वन्ध्यासुतवृत्तिरसुतत्वनिवृत्तिस्तु, स
विपक्षव्यावृत्तत्वेनासाधारणतया न हेतुरिति तु व्याख्यानम्
सुतादिव(९) चेतनादिवे(१०)त्याद्यग्रिमग्रन्थस्वरसाविरुद्धमिव

दीधितिटिप्पणी ।

साधनं शक्यत इति भावः ।](११) मतान्तरमाह । सैवेति । व
सुतस्त्वित्यस्य व्याख्यानमाह । वन्ध्यासुतस्त्विति(१२)[। अति

(१) बन्ध्यासुत—कलि० मु० पु० पा० । (२) दिव पटादेः—पुण० पु० पा
(३) नन्विदमचैतन्यमपि अस्त्येवंरूपमेव—कलि० मु० पु० पा० ।
(४) लीढवृत्तित्वमात्रे—पुण० पु० पा० ।
(५) कारकत्वभ्रमं निराकरोति । साधिकेति ।—गुणानन्दः ।
(६) या तन्मात्र—कलि० मु० पु० पा० । (७) व्यावृत्त—पुण० पु० पा० ।
(८) तथा च—कलि० मु० पु० पा० ।
(९) असुतादेरिव—कलि० मु० पु० पा० । (१०) चेतनादेरि—कलि० मु० पु०
(११) [ ] एतच्चिन्हान्तर्गतो ग्रन्थो व्याकुलाक्षरः प्रतिभाति ।
(१२) वन्ध्यासुतवृत्तिरिति—पा० २ पु० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चेतनादपि(१) काष्ठादेर्न व्यावर्तते ।

दीधितिः ।

भाति(२) ॥

दीधितिटिप्पणी ।

३) । वन्ध्यात्वरूपसाध्यम्](४) ॥

कल्पलता ।

असुतत्वनिवृत्तेरलीकत्वेन वक्तृत्वं साधयितुम-ग्यतया(५)ध्यवसेयमालोचनीयं(६) वस्तुस्वरूपम-रेण हेतुत्वं न सम्भवतीत्याशङ्कते । असुतत्वेति । रिहरति । अचैतन्येपीति । व्यावृत्तिरूपतया द्वयो-पि हेत्वोरविशेष(७) इत्यर्थः । अस्य न्यायस्येति । ावृत्तिरूपतया तुच्छत्वस्वरूपस्येत्यर्थः । वन्ध्यासुत-त्वेति । वन्ध्यासुतनिष्ठं सुतत्वमित्यर्थः । तेन न पूर्व-रोधः । अतस्मादेव स्वावच्छिन्नप्रतियोगिकान्यो-ाभाववत एवेत्यर्थः । यथा शिंशपात्वमिति । शिं-पात्वं हि पनसादेरेव व्यावर्तते, न तु शिंशपातो-ीत्यर्थः, तथा चातन्मात्रव्यावृत्तिरूपतया(८) शिंश-त्वादिवत् सद्धेतुत्वम्, तदतदुभयव्यावृत्ततया(९)

(१) रचेतनादि—कलि० मु० पु० पा० ।

(२) असाधारण्यनिर्वाहायावक्तुरिव वक्तुरिवेत्येव वक्तुमुचितमिति भावः ।

(३) श्रति भातीति-पा० २ पु० । (४) [ ] एतच्चिन्हान्तर्गतो ग्रन्थो व्याकुलाक्षरः ।

(५) योग्यतयासा-पुण० पु० पा० । (६) लोचनीय—कलि० मु० पु० पा० ।

(७) द्वयोरपि बुद्ध्योरपि विशेष—पाठः । द्वयोरपि बुद्ध्योरविषय-पा० २ पु० । द्वयोरपि रपि विशेष-कलि० मु० पु० पा० ।

(८) तथा च तन्मात्रवृत्तिरूपतया—पाठः । तथा च तन्मते व्यावृत्तिरूपतया—० मु० पु० पा० ।

(९) तदुभयव्यावृत्तिरूपतया—कलि० मु० पु० पा० । तदा तदुभयव्यावृत्तरूपतया—। पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

ऽतितुच्छत्व(१)मिति (भावः)। अतस्मादिति
क्षादेवेत्येके । तथा (च) सपक्षविपक्षोभयव्यावृत्त
ऽसाधारण्यमिति भावः । परोक्तेऽपि(२) हेतौ दो
म(३)मतिदिशति । नन्विदमिति(४) । न हि व
सुत इति । वन्ध्यासुतनिष्ठमचेतनत्वमित्यर्थः
वन्ध्यासुते यदचेतनत्वं वर्त्तते तदेव न(५) क
दौ वस्तुनि, तथा च तुल्यमसाधारण्यमिति भावः(६

वक्तृत्वं वस्त्वेकनियतो धर्मः स कथमवस
साध्यो विरोधादिति चेत्, स पुनरयं विरोधः
प्रमाणात् सिद्धः । किं वक्तृत्व(७)विविक्तस्यावस

दीधितिः ।

स पुनरित्यादि । वक्तृत्वस्यावस्तुत्वेन समं विरोध
अवस्तुत्वाभाववस्तुत्वव्याप्यत्वं, तच्च किमवस्तुनि नियमेन
वक्तृत्वाभावोपलम्भात् सिद्धम्, अवस्तुनि वक्तृत्वस्यानुपल
मात्राद्वेत्यर्थः । वक्तृत्वविविक्तस्य वक्तृत्वासंसृष्टस्य, वक्तृत्व

दीधितिटिप्पणी ।

अवस्तुत्वाभावेत्यादि । तदभावव्याप्यत्वस्यैव विरोधत्वा
भावः । सामानाधिकरण्याभावरूपविरोधस्तु नोक्तः, मूलानुरो
वस्त्वेकनियतो धर्म इत्यनेन मूलेन अवस्तुत्वाभावरूपवस्तुत्वव्या
हेतुना तद्विशेषधर्म(त्व)स्य दर्शितत्वाच्च । तच्च किमिति । अन्वय
प्तिप्रदर्शनं कृतं व्यतिरेकव्याप्त्याऽन्वयव्याप्तिर्गृह्यत इति मते । द्विविक्तस्ये
ऽन्वयव्यतिरेकज्ञानाभावरूपहेतुप्रदर्शनमिति तद्व्याप्तिबोधार्थम् ?
विक्त(पद)स्यार्थमाह । वक्तृत्वेति । वक्तृत्वं वस्त्वसंसृष्टत्वेपि अ

(१) ऽतितुच्छ—पा० २ पु० । (२) परोक्ते— पा २ पु० ।
(३) दोष— पा० २ पु० । (४) नान्विति —पा० २ पु० ।
(५) वर्त्तते न तदेव—पुण० पु० पा० । (६) मसाधारण्यमित्यर्थः—पुण० पु० पा
(७) किं कक्तृत्व-कलि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यमेनोपलम्भात, आहोस्विद् वस्तुविविक्तस्य वक्तृ-स्यानुपलम्भादिति। न तावदवस्तु केनापि(१) प्रमाणे-पलम्भगोचरः, तथात्वे वा नावस्तु। नाप्युत्तरः, मानत्वात्। न हि वक्तृत्वमिव अवक्तृत्वमपि वस्तुवि-क्तं कस्यचित् प्रमाणस्य विषयः। तद्विविक्तविकल्पमात्रं वदस्तीति चेत्, तत्संसृष्टविकल्पनेऽपि को वारयिता।

दीधितिः ।

ति यावत् । वस्तुविविक्तस्य वस्त्वसंसृष्टस्य, वस्तुभिन्नसंसृष्ट-ति यावत् । समानत्वादिति । यथाऽवस्तुनि वक्तृत्वस्यानुप-म्भेन वस्तुत्वव्याप्यत्वं तद्वदवक्तृत्वस्याप्यवस्तुन्यनुपलम्भेन स्तुत्वव्याप्यत्वं स्यात्, तथा च अवक्तृत्वमपि विरोधादवस्तु-न सिद्ध्येदित्यर्थः। मा भूदवस्तुनि वक्तृत्वाभावस्य प्रमाण-मा नि(२)र्णयो विकल्पमात्रं तु स्यादिति सिंहावलोकितेन ते(३)। तद्विविक्तेति। वक्तृत्वविविक्तावस्तुविकल्पन(मात्र)-त्यर्थः। तत्संसृष्टेति। वक्तृत्वसंसृष्टावस्तुविकल्पन इत्य-(४), तथा च विपक्षवृत्तित्वग्रहान्न व्याप्तिबुद्धिरित्यर्थः। अपरे पुनः

दीधितिटिप्पणी ।

देवत् स्यादतः, वस्तुभिन्नेत्यादि । तदेवावस्तुनीत्यादिप्राप्तेः । वलोकिते(ने)ति। प्रस्तुतं द्वितीयविकल्पप्रतिबन्धिनं(५) विहाय द्विविक्तस्येत्यादिरूपस्याद्यविकल्पस्यानेन रक्षणादिति भावः । वि-(६) सिंहावलोकितन्यायेन व्याख्यातॄणां मतमाह। (अ)परे पुनरि-

(१) केनचित्—पुग० पु० पा०। (२) प्रमाणजननान्नि—कलि० मु० पु० पा०।
(३) वलोकितेनाशङ्कते-पुग० पु० पा०। (४) इत्यर्थ-कलि० मु० पु० पा०।
(५) त्पमातिवादिदुःख-पा० २ पु०।
(६) विपक्षं—इत्यादर्शपुस्तके पाठः। विपक्ष—पा० २ पु०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिः ।

सन्निधिमनुरुन्धाना वर्णयन्ति, तद्विविक्तेति । वस्तुविविक्ता
त्याविकल्पनं वन्ध्यासुतो न वक्तेत्येवमाकारमित्यर्थः । तत्संसृष्टे
वक्तृत्वसंसृष्टावस्तुविकल्पन इत्यर्थ इति ॥

दीधितिटिप्पणी ।

ति । सन्निधिमिति । तथा चैतन्मते न हीत्यादिना तत्समानत्व
दितम्, तदेव तु तद्विविक्तेत्यादिना उक्तमिति भावः । वक्तृत्वसं
ति । तथा च समानत्वमापादितमिति भावः । मूले तत्पदद्वयेन
भिन्नयोः परामर्शोऽत्रास्वरसबीजम् ॥

कल्पलता ।

स्वरूपासिद्धिं निरस्य बाधमाशङ्क्य सामर्थ्या
दनेन निराकरोति । वक्तृत्वमिति । विविक्तस्य शू
स्य, यदलीकं तन्न वक्तृ इति(१) तावन्न केनचि
माणेनो(२)पलभ्यते यतो विरोधः स्यादित्यर्थः(३)
आहोस्विदिति । वस्तुत्व(४)शून्ये वक्तृत्वं क्वापि
पलब्धमित्ययं विरोध इत्यर्थः । (तदयमर्थः ।)
वक्तृत्व(५)शून्यस्यालीकस्य नियमेनो(६)पलम्भा
रोध उत वस्तुत्व(७)शून्ये वक्तृत्वस्यानुपलम्भा
रोध इत्यर्थः(८) । आद्य आह । न तावदिति । द्वि
आह । समानत्वादिति । अत्रापि प्रमाणापेक्षा(९)
आवश्यकत्वादित्यर्थः । अनुपलम्भस्याप्यभाव
हकत्वे प्रमाणमेव मूलम्, अनुपलम्भमात्रं(१०) तु

(१) यदलीकं न वक्तृ तदिति–पुण० पु० पा० । (२) प्रमाणेन नो—पा० २
(३) स्यात्—पुण० पु० पा० । (४) वस्तु—कलि० मु० पु० पा० ।
(५) वक्तृ—कलि० मु० पु० पा० । (६) नियमो—पुण० पु० पा० ।
(७) वस्तु—कलि० मु० पु० पा० । (८) इति—पुण० पु० पा० ।
(९) प्रामाण्यापेक्षा—पुण० पु० पा० । प्रमाणापेक्ष—कलि० मु० पु० पा० ।
(१०) मानं—पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

कल्पलता ।

क्रमतन्त्रं स्वादृष्टिसर्वा(१)दृष्टिविकल्पकवलितत्वा·
ति(२) भावः। तद्विविक्तेति। वन्ध्यासुतो न वक्तेति
स्तुविवेकेनावक्तृत्वं गृह्यत एवेत्यर्थः। तत्संसृष्टेति।
न्ध्यासुतो वक्तेति वक्तृत्व(३)संसृष्ट(मध्य)वेदन·
घ्यसत्ख्यातिरूपं त्वन्मते(४) स्यादेवेत्यर्थः॥

ननु वक्तृत्वं वचनं प्रति कर्तृत्वम्, तत् कथमव-
तुनि, तस्य सर्वसामर्थ्यविरहलक्षणत्वादिति चेत्, अव-

दीधितिः ।

तत्कथमिति। कर्तृत्वं हि कारित्वविशेषो वा तत्सामर्थ्यं वा, द्व·
मपि सर्वसामर्थ्यविरहिण्यवस्तुनि न सम्भवतीत्यर्थः। अवक्तृ(५)·
मित्यत्र नञर्थस्य धात्व(६)र्थेनान्वयः, तद्धितार्थेन वा। आद्ये वच·
भावो वचनभिन्नं वाऽर्थः, निषेधविधौ प्राभाकराणां क्रियाविरह-
वृ(७), अप्रमाणमित्यत्र प्रमाभिन्नज्ञानवद्वा, उभयथापि वचनेतर·

दीधितिटिप्पणी ।

सामर्थ्यविरहेपि वचनं प्रति कर्तृत्वस्य किमायातमत आह।
र्तृत्वं हीति। अवक्तृत्वपदेन वक्तृत्वाभाव एव बोध्यते, वचने·
कर्तृत्वं तु कुत इत्यत आह। अवक्तृत्वमित्यत्रेति। नञो धात्व·
न्वयस्थले धात्वर्थाभावस्य धात्वर्थभेदस्य च वाचकत्वं क दृष्टमि·
तो यथासङ्ख्येन दर्शयति। प्राभाकराणामिति। उभयथापीति।
चनाभावपक्षेपि वचनाभावस्य वचनेतरत्वादेव तत् प्रतीयत इति
वः। एकस्य कर्तृत्वनिषेधे तदितरस्य कर्तृत्वमवगम्यत इति न्या·

---

(१) सर्व—कलि० मु० पु० पा०। (२) करम्बितत्वादिति—कलि० मु० पु० पा०।
(३) वक्तृत्वं--पुण० पु० पा०। (४) रूपं तन्मते—कलि० मु० पु० पा०।
(५) अवकृ-कालि० मु० पु० पा०। (६) धात्य· कलि० मु० पु० पा०।
(७) न कलञ्जं भक्षयेदित्यादौ कलञ्जभक्षणाभावविषयकं कार्यमित्यन्वयस्वीकारादिति भावः।

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्तृत्वमपि कथं तत्र, तस्य वचनेतरकर्तृत्वलक्षणत्वा ति(१)। सर्वसामर्थ्यविरहे वचनसाम(२)र्थ्यविरहो विरुद्ध इति चेत्, अथ सर्वसामर्थ्यविरहो वन्ध्यासु कुतः प्रमाणात् सिद्धः। अवस्तुत्वादेवेति(३) चे(४) नन्वेतदपि कुतः सिद्धम्। सर्वसामर्थ्यविरहादिति(चेत्, सोऽयमितस्ततः केवलैर्वचनैर्निर्धना(५)धमर्णिक साधून् भ्रामयन् परस्पराश्रयदोषमपि न पश्यति।

दीधितिः।

कार्यकर्तृत्वं पर्यवस्यतीत्याह। तस्येति। द्वितीयं(६) शङ्कते। सर्वे केचित्तु विशेष(७)निषेधस्य शेषा(८)ऽभ्यनुज्ञाफलकतया औ गिकत्वाद्वचनकर्तृत्वनिषेधेऽनुज्ञातं वचनेतरकर्तृत्वं दूषयति। कर्तृत्वमपीति। आपवादिकनिषेध(मात्र)परत्वाभिप्रायेण श सर्वेत्यादीत्याहुः। वचनेत्यादि। उपलक्षणमेतत्। वचनक त्वविरहोपि द्रष्टव्यः। अवस्तुत्वात् काल्पनिकत्वात्, अर्थक्रि कारित्वशून्यत्वाद्वा॥

दीधितिटिप्पणी।

येन वचनेतरकर्तृत्वं लिखितमिति वादिनां मतमाह। केचित्वि आपवादिकेति। निषेधमात्रविशेषणं तत्। अतोऽपवादस्य बल दिति भावः। वस्तुत्वनिर्वचने सत्त्वे एव पर्यवसानात् तदभाव सिद्ध्याह। अवस्तुत्वादिति। काल्पनिकत्वमपि वस्तुव्यावृत्तं दुर्व आह। अर्थक्रियेति॥

(१) लक्षणत्वात्—पुण० पु० पा०। (२) सामा—कलि० मु० पु० पा०
(३) अवस्तुत्वादिति—पुण० पु० पा०। (४) विरहादेवेति—पुण० पु० पा०।
(५) सोयं केवलैर्वचनैरितस्ततो निर्धना—पुण० पु० पा०।
(६) द्वितीयं, तद्धितार्थे नञर्थान्वयम्।—गुणानन्दः।
(७) विशेषः, वचनम्।—गुणानन्दः। (८) शेषः, वचनेतरत्।—गुणानन्दः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

प्रत्यनुमाने(१) बाध(क)माशङ्कते । नन्विति । पर्युदासपक्षे तथापि तुल्यमिदमित्याह(२) । अवस्तुत्वमपीति । स्वसाध्ये(३) प्रसज्यप्रतिषेधमाशङ्क्याह । सर्वेति(४) । अवस्तुत्वं वचनसामर्थ्या(५)भाव एव मया साध्य(त)इति न विरोध इति भावः । सर्वसामर्थ्यविरहे तु वचनसामर्थ्यविरहस्तदा(६) स एव कुतः सिद्ध इत्याह । अथेति । एतदपीति ।(७) अवस्तुत्वमपीत्यर्थः । केवलैरिति ।(८) अर्थशून्यैरित्यर्थः । परस्पराश्रयेति(९) । अवस्तुत्वात् सामर्थ्यविरहस्तत एव चावस्तुत्वमित्यर्थः(१०) ॥

क्रमयौगपद्यविरहादिति चेन्न(११) । तद्विरहासिद्धावपि प्रमाणानुयोगस्यानुवृत्तेः । सुतत्वे च परामृष्य-

दीधितिः ।

क्रमादिविरहादवस्तुत्वासिद्धिरित्याशङ्कते । क्रमेति । शङ्कां निरस्यति । नेति । न वा क्रमादिविरहः साधयितुमपि शक्य

दीधितिटिप्पणी ।

मूले तद्विरहसिद्धाविति विषयसप्तमी । अविनाभूतपदस्य व्याप्तिमात्रवाचकत्वात् न प्रकृते लगतीति बहुव्रीहिणा व्यापकत्वं सङ्ग-

(१) प्रत्यक्षमाने-कलि० मु० पु० पा० । (२) तुल्यमिदमा-कलि० मु० पु० पा० ।
(३) मपीति । असाध्ये-पुण० पु० पा० । (४) मासृत्याह-कलि० मु० पु० पा० ।
(५) वचनसामान्या—पा० २ पु० ।
(६) सर्वसामर्थ्यविरह एव चनसामर्थ्यविरहः—पुण० पु० पा० ।
(७) एतदपि—पुण० पु० पा० । (८) केवलैः—पुण० पु० पा० ।
(९) परस्परेति—पुण० पु० पा० ।
(१०) चावस्तुत्वमिति प्रवसति—कलि० मु० पु० पा० ।
(११) दिति । न—पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Ha

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणे तदविनाभूतसकलवक्तृत्वादिधर्मप्रसक्तौ क्रमयौगपद्यविरहसाधनस्यावकाशः, कुतस्तरां चा त्वसाधनस्य, कुतस्तमां चावक्तृत्वादिसाधनानाम्

दीधितिः ।

इत्याह । सुतत्वे चेति । तत्(१) सुतत्वमविनाभूतं येन, व्यापकमिति(२) यावत् । वक्तृत्वादीत्यादिपदात् सामर्थ्य त्वक्रमादीनां परिग्रहः । क्रमादिविरहावस्तुत्वसामर्थ्यविरह त्वादीनां पूर्वपूर्वस्यासिद्ध्या तत्साध्योत्तरोत्तरासिद्धिरित्य

दीधितिटिप्पणी ।

मयति । तदित्यादि । पूर्वपूर्वस्येत्यादि । यदि क्रमादिविरहः तदा तेनावस्तुत्वं साध्यं यदि चा(वस्तु)त्वं सिद्ध्येत् तदा तेन र्थ्यविरहः सिद्ध्येत, इत्यादिक्रमेणेत्यर्थः । अत एव मूले कुतस्त त्यादि वक्ष्यति ॥

कल्पलता ।

क्रमेति ।(३) क्रमयौगपद्यविरहात् सामर्थ्या साध्ये कान्योन्याश्रय इत्यर्थः । न तद्धिरहेति क्रमयौगपद्यविरहात् सर्वसामर्थ्यविरहः ततश्चा त्व(५)(मवस्तुत्वाच्च) क्रमयौगपद्यविरह इति च मिति भावः । सुतत्वेनैव हेतुना वक्तृत्वं क्रमयौ द्यं(६) वस्तुत्वं च सर्वमेकवारमेव(७) मया साध मिति त्व(८)त्साधनानामनवसरपराहतत्वमित्या सुतत्वे चेति(९) ॥

(१) तत्—कलि० मु० पु० नास्ति । (२) व्यापक इति—पुण० पु० पा० ।
(३) क्रमेति ।—इति कलि० मु० पु० नास्ति । (४) न हि-कलि० मु० पु० पा०
(५) वस्तुत्वं-पुण० पु० पा० । (६) हेतुना क्रमयौगपद्यं वक्तृत्वं-पा० २
(७) मेकवारेणैव—पुण० पु० पा० । मेकरूपेण—पा० २ पु० ।
(८) मिति त—पा० २ पु० । (९) मित्याह । असुतत्वे चेति—पुण० पु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मात् प्रमाणमेव सीमा व्यवहारनियमस्य, तदतिक्रमे नियम(१) एवेति । अ ह्यप्रतीते देवदत्तादौ स किं : कृष्णो वेति वैयात्यं विना प्रश्नः । तत्रापि कोऽप्रतीतपरामर्षविषय(२) एवोत्तरं ददाति(३) इति, अपरोऽपि किं न दद्यात्(४) कृष्ण इति । चैवं सति काचि(५)दर्थसिद्धिः, प्रमाणाभावविरो- रुभयत्रापि तुल्यत्वादिति ।

दीधितिः ।

अस्तु तर्हि विधिनिषेधव्यवहारभाजनत्वमेवासत इत्येतदु- रव्याजेन निरस्यति । तस्मादिति । तथा चाऽसति प्रमा- रहान्न व्यवहार(६)प्रवृत्तिरिति । वैयात्यम् धार्ष्ट्यम् । प्रतीतेति ।) न प्रतीतः स इति(७)तच्छब्दपरामर्शविषयो स तथा(८) ॥

दीधितिटिप्पणी ।

प्रतीतेति मूलस्य समासपुरस्सरमर्थमाह । न प्रतीत इत्या- स इतीति । स किं गौर इत्यत्र सपदरूपतच्छब्देन यत् परामर्श- तस्य न ज्ञानमित्यर्थः ॥

कल्पलता ।

एवं प्रतिबन्दि(९)मुखेन परमतं(१०) दूषयित्वा

(१) तदतिक्रमेऽनियम—पुण० पु० पा० ।
(२) ऽप्रतीतपरामर्शविषय—कालि० मु० पु० पा० । ऽविदितपरामर्शविषय इति भगीरथ-पाठः । (३) ददाति न—कालि० मु० पु० पा० । (४) दद्यान्न—कालि० मु० पु० पा० ।
(५) कदाचि—पुण० पु० पा० । (६) प्रमाणविरहान्न-कालि० मु० पु० पा० ।
(७) स इति प्रश्नस्थपदोपदर्शनम् ।-गुणानन्दः । (८) सः—कालि० मु० पु० पा० ।
(९) प्रतिबान्धि—पा० २ पु० । (१०) परमतेन—कालि० मु० पु० पा० ।

CC-0. In Public Domain. ...

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

स्वमतमुपसंहरति । तस्मादिति । व्यवहाराविष
सर्व(२)विधिनिषेधव्यवहारः यादाविलोपमुदाहर
दर्शयति । न हीति । वैयात्यम् धाष्टर्यम् ।(३)
व्यवस्थामेव दर्शयति । तत्रापीति । अर्थसिद्धि
(। प्रश्नविषयार्थसिद्धिरित्यर्थः)॥

नन्वप्रतीते व्यवहाराभाव इति युक्तम् । कू
मादयस्तु प्रतीयन्त एव । न ह्येते विकल्पाः कश्चि
भेदमनुल्लिखन्त एव उत्पद्यन्ते । न च प्रमाणास्प
व्यवहारास्पदमिति । तन्न युक्तम्(४)। तथाहि ।
विषाणमिति ज्ञानमन्यथाख्यातिर्वा स्यात्, असत्
तिर्वा(५) । न तावदाद्यस्ते रोचते, तथा सति (हि)
श्चिदारोप्यं किञ्चिदारोपविषय इति स्यात्, तथा च
पविषयस्तत्रैवास्ति आरोपणीयस्त्वन्यत्रेति(६)
नैयायिकैः । नापि द्वितीयः, कारणानुपपत्तेः । इन्द्रि

दीधितिः ।

व्यवहारे(७) ज्ञानत्वेनैव प्रयोजकत्वं, न तु प्रमात्वेन,
त्वात्, त्वयापि भ्रान्तेस्तथात्वोपगमादित्याशयेनाह । नन्विति ।

(१) व्यवहाराविशेषेऽपि—पाठः । व्यवहारविषये—पुण० पु० पा० ।
(२) सर्व—२ पु० नास्ति । (३) वैजात्यम् धर्म्यम् । तत्र—पुण० पु० पा०
(४) तत्त्वमुक्तम्—पाठः । (५) न्यथाख्यातिर्वाऽसत्ख्यातिर्वा— पुण० पु० पा०
(६) स्त्वन्यत्रैवेति—कलि० मु० पु० पा० ।
(७) तथा व्यवहार—कलि० मु० पु० पा० । पौनरुक्त्यमाशङ्क्य युक्तिप्रणयनेन
द्धरति । इति । एवकारव्यवच्छेद्यं स्पष्टयति । न त्विति ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नजनने विषयाधिपत्येनैव व्यापारात्(१), लिङ्ग-
दाभासयोरप्य(२)न्यथाख्यातिमात्रजनकत्वात्, अप-
ततस्वार्थयोश्चासत्ख्यातिजनकत्वे शशविषाणादि(३)-
दात् कूर्मरोमादिविकल्पानामप्युत्पत्तिप्रसङ्गात्, निया-
भावात् ।

दीधितिः ।

विषाणं कूर्मरोमेत्या(द्या)काराः । विषयाधिपत्यम्
पसन्निकर्षः। विभ्रमादौ च ज्ञान(४)मेव तथेति भावः।
ति। अलिङ्गमपि लिङ्गतया गृहीतं गृहीतव्यापकभावं तज्जा-
वा(५) पक्षासंसृष्टमेव पक्षसंसृष्टं बोधयदन्यथाख्याति-
त्पादयेत्, व्याप्तिग्रहानपेक्षणेऽतिप्रसङ्गात्। अनन्वितौ च
र्थावन्वितौ बोधयन्तौ शब्दावपि तथैव(६)। स्वार्थतिरस्कारेण
स्य बोधकत्वे पुनराह। अपहस्तितेति॥

दीधितिटिप्पणी।

तिथात्वम् व्यवहारप्रयोजकत्वम्। (पक्षसंसृष्टं बोधयत्) पक्षसं-
वेन बोधयत्। ननु पक्षसंसृष्टमलीकमेव भासतामत आह।
ाति। यस्य व्याप्तिग्रहस्तदेवानुमितौ भासते, न चालीकस्य
तिग्रह इति भावः। ननु यदि शशपदेन विषाणपदेन च शशं
णं चोपस्थाप्यान्वितोभयं बोध्यत इत्युच्येत, तदैवान्यथाख्या-
शङ्क्येत, किन्तु शशविषाणपदाभ्यां स्वार्थोपस्थितिं विनैवाली-
ाखण्डशशशृङ्गं बोध्यत इत्यत आह मूले, अपहस्तितेति। कूर्मेति
म्, यथा तेन शक्तिं विनापि शशविषाणं बोध्यते, तथा कूर्मलो-
बोध्यताम्, तुल्यन्यायत्वादिति भावः॥

(१) व्यापारवत्त्वात्—पुण० पु० पा०। (२) शब्दाभासयोर—कलि० मु० पु० पा०।
(३) विषाण—पुण० पु० पा०। (४) ज्ञानादिक—कलि० मु० पु० पा०।
(५) सामान्यलक्षणाप्रत्यासत्तेरनुपगमे त्वाह। तज्जातीयं वेति। व्याप्तिः पक्षधर्मताया
ऽच्चणम्।—गुणानन्दः। (६) तथैव, अन्यथाख्यातिमेवोत्पादयतः।—गुणानन्दः।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

ननु लाघवाद् ज्ञात एव व्यवहारोऽस्तु, किं
तत्त्वपर्यन्तेनेत्याशङ्कते । नन्विति । एत इति
रोम(१)शशशृङ्गादिगोचरा इत्यर्थः । न चेति ।
वादिति भावः । प्रमाविषयत्वं प्रमाविषयत्वव्या
वेत्यसत्ख्यातौ विप्रतिपत्तिः । व्याप्यत्वव्यतिरेक
रधिकरण आकाशादौ प्रसिद्धः, सामानाधिकरण
विशेषस्य(३) व्याप्तित्वात् । यद्वा नित्यद्रव्या(४)
यकमिदं रजतमिति ज्ञानं विशेषणान्याव्यास
त्ति(५)प्रतियोगिताकात्यन्ताभावाप्रतियोग्यत्यन्त
व(६)प्रतियोगिमात्रविषयकं न वा(७), स्वाति
प्रमेय(८)विषयं न वेति विप्रतिपत्तिः(९) । जि

---

(१) कूर्मलोम—पा० २ पु० ।

(२) प्रसिद्धः, स्वसामानाधिकरण्य—पुण० पु० पा० ।

(३) नियतसामानाधिकरण्यरूपस्येत्यर्थः । (४) नित्यद्रव्य—पुण० पु० पा

(५) विशेषणान्यव्यासज्यवृत्ति—कलि० मु० पु० पा० ।

(६) प्रतियोगिकात्यन्ताभावात्यन्ताभावा—कलि० मु० पु० पा० । प्रतियोगिवदत्य
प्रतियोग्यत्यन्ताभाव—पुण० पु० पा० ।

(७) मात्रं (?)—कलि० मु० पु० पा० । (८) प्रमेयातिरिक्त—कलि० मु० पु

(९) प्रथमविप्रतिपत्तौ कालिकादिसम्बन्धेन गगनादेरपि प्रमाविषयत्वसामानाधि
गमसम्भवात् निषेधकोटयप्रसिद्धिर्नैयायिकानां स्यादतो द्वितीयादिविप्रतिपत्त्यनुसरणं बोध्य
त्यद्रव्याविषयकमिदं रजतमिति भ्रमज्ञानं विशेषणान्यकेवलान्वय्यत्यन्ताभावप्रतियोगिमात्रवि
वेति द्वितीयविप्रतिपत्तिनिष्कर्षः । एवं चाकाशज्ञानेऽप्याकाशत्वादेः केवलान्वय्यत्यन्ताभावा
नो भानान्मात्रविषयकत्वरूपविधिकोटयप्रसिद्धिवारणार्थं विशेषणान्येति विषयविशेषणं
भिन्नार्थकम् । तथा च सति केवलान्वय्यत्यन्ताभावप्रतियोगिमात्रनिष्ठविशेषणतान्यविषयता
पर्यवस्यति । अत्र सन्नपि कश्चिन्मुख्यविशेष्यतयाभासतामित्यर्थान्तरवारणाय मात्रपदम् । केव
चात्यन्ताभावस्य अव्यासज्यवृत्तिप्रतियोगिताकात्यन्ताभावाप्रतियोगित्वम् । तत्र शुक्त्यति
भ्रमविषयीभूतरजतत्वाभाववान्, देशत्वात्, शुक्तिवदित्यनुमानमेव प्रमाणम् । अत्र केव
त्यन्ताभावप्रतियोगिनोऽपि रजतत्वोर्दगगनोदरिव स्वरूपेण नासत्त्वसिद्धिरित्यस्वरसात् तृती
पत्त्यनुधावनम् । तत्र च स्वपदं यत्किञ्चिद्वस्तुपरम्, तदतिरिक्तप्रमेयाविषयकत्वं च नैय
तन्मात्रगोचरनिर्विकल्पकादौ प्रसिद्धमिति ध्येयम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

। प्रमितमेव व्यवहारविषय इतिवादिभिरित्य-
। परिशेषेण कारणाभावमेव व्यवस्थापयति । इ-
यस्येति । विषयाधिपत्यम् विषयसहकारिता,
द्रियार्थ(१)सन्निकर्षजन्यत्वात् प्रत्यक्षस्येत्यर्थः ।
रोपस्यासन्निकर्षेऽपि(२) क्वचित्सन्निकर्षो वक्त-
एवेति भावः । ननु प्रत्यक्षाभासाभावेऽपि लिङ्गा-
सा(च्छब्दाभासा)द्वा स्यादसत्ख्यातिरित्यत आ-
। लिङ्गेति । धूलीपटले धूमारोपादसन् वह्नि(३)-
सेत पर्वते, तत्र धूमस्य धूलीपटलस्य वह्नेश्च(४)
तितत्वं क्वचिद्वाच्यमेवेत्यन्यथाख्यातिपर्यवसानमेव ।
(५) चानाप्तोदीरिताच्छब्दात् पदार्थो वाक्यार्थो
प्रतीतचर(६) एव भासत इत्यन्यथाख्यातिरेवे-
र्थः । ननु स्यादेवं यदि व्याप्तिबलात् सङ्केतबला-
भानं भवेन्न त्वेवमित्यत आह । अपहस्तितेति ।
रस्कृतस्वार्थयोरित्यर्थः । लिङ्गस्य स्वार्थो(७) व्या-
रो वन्ह्यादिः, शब्दस्य चार्थः सङ्केतविषयः, तत्ति-
कारे नियमो न स्यादिति भावः(८) । शशविषा-
शब्दादित्युपलक्षणम्, शशविषाणव्याप्यत्वेन गृ-
तादित्यपि द्रष्टव्यम् ॥

---

(१) इन्द्रिय-पुण० पु० पा० । (२) स्यासन्निकर्षेऽपि—कालि० मु० पु० पा० ।
(३) दसद्वन्हि—कालि० मु० पु० पा० । (४) वन्हेः-पुण० पु० पा० ।
(५) पर्यवसानमेवं—कालि० मु० पु० पा० ।
(६) प्रतीत-कालि० मु० पु० पा० । प्रतीतवचन-पा० २ पु० । प्रतीतिचर-पुण० पु० पा० ।
(७) लिङ्गस्य अर्थो—पुण० पु० पा० ।
(८) तथा च शशविषाणमिति पदं विकल्पजनकत्वे सति कूर्मरोमाद्यविषयकविकल्पप्रयोज-
कं यदि न स्यात् तद्विषयकविकल्पोत्पादकं स्यादित्यापादने तात्पर्यम् ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

स हि सङ्केतो वा स्यात्, शब्दस्वाभाव्यं
आद्यस्तावत्(१) सङ्केतविषयाप्रतीतेरेव पराहतः।
एव(२) तत्प्रतीताावितरेतराश्रयत्वम् । पदसङ्केत(
बलेनैव प्रतीतौ(४) स्वार्थापरित्यागात्, तथा चानन्वि
पदार्था एवान्विततया परिस्फुरन्तीति विपरीतख्याति
(नु)वर्तते । स्वार्थपरित्यागे तु पुनरप्यनियमः, अस
यिकार्थप्रत्यायनात् । शब्दस्वाभाव्यात् तु नियमे व्युत्
वदव्युत्पन्नस्यापि तथाविधविकल्पोदयप्रसङ्गादिति(५

दीधितिः ।

स हीति । सः नियामकः(६) । सङ्केतो वाक्यस्य(७),(८)
योर्वा । आद्ये, आद्य इति । वाक्यस्य सङ्केतविषयोऽखण्डश
शशविषाणादिः । द्वितीये स्वाभिहितैवान्यथाख्यातिरावर्तत श
स्याह । पदेति । अथ सतोरेवार्थयोर्दोषवशादसन् संसर्गोख
लिङ्गशब्दाभासाभ्यां बोध्यत इति चेत्, तत्रासन्निति स(

दीधितिटिप्पणी ।

तत्रेति । तत्रासन् संसर्गो भासत इति मयाप्युच्यते, सर्वथा

(१) सङ्केतश्च शशविषाणमितिपदसमुदायस्य वा, प्रत्येकं वा शशविषाणपदयोः आद्यस्तावदिति ।—भगीरथठक्कुरः । (२) पराहतः । इत एव—पाठः ।

(३) नन्वस्तु द्वितीयः, तथाहि, यथा सुभ्रूपदे प्रत्येकगृहीतसङ्केतपदस्यार्थे सङ्केत वाक्यार्थे सङ्केतग्रहस्तथा शशविषाणपदेऽपि स्यादित्यत आह । पदसङ्केतेति । पदानां प्र र्थमुपजीव्य संसर्गबोधकत्वमनुपजीव्य वा । आद्येऽन्यथाख्यातिरेवेत्याह । तथा चेति प्रत्येकपदार्थानुपजीवनं प्रत्येकपदार्थपरित्यागे सत्येवेति पूर्वोक्तानियमप्रसङ्ग एवेत्याह । स्वार्थे भगीरथठक्कुरः । (४) प्रवृत्तौ—पुण० पु० पा० । (५) प्रसङ्गः—पुण० पु० पा०

(६) विशेष्यीभूताभावानुकर्षणभ्रमं निराकरोति । नियामक इति ।—गुणानन्दः ।

(७) अग्रिमानुसारेण विकल्पयति । वाक्यस्येति ।—गुणानन्दः ।

(८) ऽखण्ड—कलि० मु० पु० पा० । वाक्यस्यापि अन्यथाख्यातिविषयस्य सम्भव अखण्ड इति ।—गुणानन्दः । (९) दसत्संसर्गो—कलि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिः।

थैवासन्निति (तु) कुतः ॥

दीधितिटिप्पणी।

र्गः पुनर्न भासताम्, हेत्वभावादित्यर्थः ॥

कल्पलता।

उपलक्षणविधया(१) शब्दाभासमेव अधिकृत्य(२) कल्पयति। स हीति। नियामक इत्यर्थः। सङ्केतग्रहः र्थे पदं नियमयेत्, स च नास्तीत्यर्थः। वाक्यार्थ- यमोऽपि सङ्केतविषयाप्रतीतेरेव परास्त इति भावः। शशविषाणशब्दादेव गृहीतसङ्केतस्ततो नियत- प्रतीयादित्यत आह। तत एवेति। नन्वखण्डः(३) शविषाणपदार्थः कश्चिन्मास्तु, शशविषाणशब्द- (४)गृहीतसङ्केतयोरेव सामर्थ्याद्वाक्यार्थः कश्चि- न्नेव भासतामित्यत(५) आह। पदसङ्केतेति। एवं च शसम्बन्धित्वं विषाणांशे समारोप्यत(६) इत्यन्य- ख्यातिरेवेत्यर्थः। ननु पदयोः स्वार्थस्फुरणे स्यादे- ७), न त्वेतदस्तीत्यत आह। स्वार्थेति। कथम- यम इत्यत आह। असामयिकेति। ननु विषया- तीतेः सङ्केतो मा गृह्यतां, शशविषाणादिपदाना- दृश एव स्वभावभेदो येन नियतार्थप्रतीतिः स्या- त्यत आह। शब्देति(८)। एवं सति सर्वेषां पदा- मेवंस्वाभाव्ये सङ्केतग्रहोपयोगो न स्यादेवेत्यर्थः(९)॥

(१) उपलक्षणाविषय–पुण० पु० पा०। (२) शब्दाभासमेव तन्त्रं कृत्वा–कलि० मु० पु० पा०।
(३) ननु खण्डः––पुण० पु० पा०। (४) विषाणपदयो—पुण० पु० पा०।
(५) भासत इत्यत—पा० २ पु०।
(६) शशसम्बन्धित्वं विषाणे विषाणसम्बन्धित्वं वा शशे समारोप्यत—पुण० पु० पा०।
(७) स्वार्थस्फुरणं स्यादेव—कलि० मु० पु० पा०।
(८) शब्देति—पुण० पु० पा०। (९) न स्यादित्यर्थः—पा० २ पु०।

वासनाविशेषादिति चेत्(१), अथासदुल्लेखि
प्रत्ययस्य वासनैव कारणम्, उत वासनापि। न
वदाद्यः, शशविषाणादिप्रत्ययानां सदातनत्वप्रसङ्गा
कदाचित् प्रबोधात् कदाचिदिति चेन्न। प्रबोधो
सहकार्यन्तरं वा, अतिशयपरम्परापरिपाको वा। अ
वासनैवेतिपक्षानुपपत्तिः। द्वितीयेऽपि(२) यद्यर्थान्तरप्र

दीधितिः।

वासनाविशेषवशात्(३), नियत(४)विषयाऽसत्ख्याति
(शेषः)। सदातनत्वेति। वासना(५)सन्तानस्याविच्छि
तया शशविषाणादिविकल्पसन्तानोऽप्यविच्छिन्नः स्यादित्यर्थ
(कदाचिदिति।) वासनायाः(६) कदाचित्प्रबोधात् शश
षाणादिप्रत्ययानां कदाचिदुत्पत्तिरिति। अतिशयः तत्त
त्कार्यानुकूलः स्वभावविशेषः(८)। यदीति। अर्थान्त
सहकारिणः प्रत्यासत्तेर्यदि परिपाकः, तदा पूर्वस्मिन प्रत्य

दीधितिटिप्पणी।

वासनाविशेषादिति मूलस्य पूरणम्, नियतविषयेत्या
अर्थान्तरस्येत्यस्य व्याख्या, सहकारिण इति। वितर्के
पाकप्रवेश इत्यतोऽत्र परिपाक इत्युक्तम्। तथा च प्रत्या
रित्यस्य वितर्कस्थपरिपाक इत्यनेन सम्बन्धः। पूर्ववदि
व्याख्या, पूर्वस्मिन्नित्यादि। वितर्कयोराद्यकल्पे सहकार्य

(१) चेन्न—पुण० पु० पा०। (२) द्वितीये तु—पुण० पु० पा०।

(३) वासनाविशेषादिति मूलमुपस्करोति। वासनाविशेषवशादिति। एवं कदाचि
ममूलेपि। (४) पञ्चम्यर्थान्वयिनं पूरयति। नियतेति।—गुणानन्दः।

(५) स्वतः सदातनत्वासम्भवादाह। वासनेत्यादि।—गुणानन्दः।

(६) कस्य प्रबोध इत्याकाङ्क्षायां पूरयति। वासनाया इति। कदाचिदित्यस्य सार्क
प्रकृतोपपादकं पूरयति। शशेत्यादि।—गुणानन्दः। (७) त—पुण० पु० पा०।

(८) स्वभावविशेषः, कुर्वद्रूपत्ववान।—गुणानन्दः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्तेः, तदा पूर्ववत् । स्वसन्ततिमात्राधीनत्वे तु बाह्य-
दव्याघातः, नीलादिबुद्धीनामपि वासनापरिपाकादेवो-
ादात्(१) । वासनापीति पक्षे (तु) तदन्योऽपि हेतुः
श्चिद्वक्तव्यः(२), स च विचार्यमाण: पूर्वन्यायं नाति-
ेत इति ।

दीधितिः ।

कार्यन्तराधीनत्वे यद् दूषणं सहकार्यसम्भवो वक्ष्यते(३) सो-
ापीत्यर्थः । केचित्तु परिपाको(४) यदि सहकारिविशेषात्,
ा परिपाक(५)द्वारा अवश्यकत्वात् साक्षादेव वा विकल्पे तस्य
रणत्वाद्वासनैवेतिपक्षानुपपत्तिरित्यर्थ इत्याहुः । पूर्वन्या-
इन्द्रियादेर्विषयाधिपत्यादिकम् । न चादृष्टविशेष(६) एव
हकारी वक्तव्यः, नीलादिविकल्पानामपि वासनासमुत्थत्व-
ङ्गात् । वस्तुतस्तत्व(७)सत्ख्यातौ(८) प्रमाणसत्त्वे तत्र
रणं कल्पनीयं, तदेव तु नास्ति, प्रमाणेनासदंशस्यानुल्लेखे-

दीधितिटिप्पणी ।

ाभिधानात् पूर्वत्वम् । अतिशयपरम्परेत्यादेरपि सहकार्य-
रपरत्वे प्रबोधोपि सहकार्यन्तरमित्यादिमूले कल्पद्वयासङ्गतिः,
द्यकल्प एवान्तर्भावादित्यस्वरसः केचिदित्यनेन सूचितः । नीला-
ति । अदृष्टविशेषसहकारेण वासनयैवालीकज्ञानादिवत् नीलादि-
ं जन्यत इत्यनेन रूपेण सम्भवे नीलादिकं न सिध्येदिति भावः ।

(१) परिपाकादेरेवोत्पादात्--पाठः ।
(२) तदन्योपि कश्चिद्धेतुर्वक्तव्यः—पुण० पु० पा० ।
(३) स च विचार्यमाण इत्याद्युत्तरग्रन्थ इति भावः ।
(४) परीपाको—पुण० पु० पा० । (५) परीपाक—पुण० पु० पा० ।
(६) न वादृष्टविशेष एव--कलि० मु० पु० पा० ।
(७) नन्वन्यथाख्यातौ या सामग्री भवद्भिरिष्यते सैवासत्ख्यातौ मया वाच्येत्याशङ्क्य मूल-
माह । वस्तुत इति ।—गुणानन्दः । (८) त्ख्याति—कलि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिः ।

ऽसत्ख्यातित्वासिद्धिः, उल्लेखे तु प्रमाणस्याप्रमाणताया असतो वा सत्त्वस्य प्रसङ्गादिति ॥

दीधितिटिप्पणी ।

उल्लेख इति । असद्विषयकं यदि तदा कथं प्रमाणम्, (प्राम यदि) तदा कथमसत्त्वमर्थस्य, प्रमाणविषयत्वेन तस्य स स्यादित्यर्थः ॥

कल्पलता ।

वासनाविशेषादित्यनन्तरं नियमः स्यादिति ष: । सदातनत्वप्रसङ्गादिति । अपेक्षणीयान्तराभ दिति भावः । कदाचिदिति । प्रबोधनाद्वासन इत्यर्थः(२) । शशविषाणादिप्रत्यया इति विप णामेनानुषङ्गः । अतिशयेति । अतिशयो वास तत्परम्परायाः(३) (स) कश्चित् परिपाको येन शश षाणादिप्रत्ययोत्पत्तिरित्यर्थः । परिपाको(पि) वा नाया यद्यर्थान्तरप्रत्यासत्त्यधीनस्तदा वासनैवे पक्षानुपपत्तिरेवेत्याह । यद्यर्थान्तरेति(४) । स्वसन्ततिमात्राधीन एव तत्परिपाको न तु तत्र सहकार्यन्तरापेक्षेत्यत आह(५) । (स्व)सन्ततीति एवं सति नीलादिविकल्प(६)कादाचित्कत्वम् वासनापरि(७)पाकादेव स्यादित्यर्थः, नीलादिवि ल्पकादाचित्कत्वेन त्वया नीलादीनि बाह्या

---

(१) अप्रमाणताया इति । असद्विषयकत्वादिति भावः । सत्त्वस्येति । प्रमाणविषय तत्त्वादिति भावः । असदंशेऽप्रमाणत्वेऽपि ख्यातिविषयत्वांशे प्रामाण्योपगमे नोक्तदोष इति तत्र तस्यासत्त्वे प्रमाणाभावे तात्पर्यात् ।—गुणानन्दः ।

(२) कदाचिदिति ।—कालि० मु० पु० पा० । (३) वासनापरम्परायाः—पा० २

(४) यद्यर्थान्तरमिति —पुण० पु० पा० । (५) त्यर्थः—पुण० पु० पा० ।

(६) विकल्पः—कलि० मु० पु० पा० । (७) वासनापरी—कालि० मु० पु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

क्रियन्ते, तच्च कादाचित्कत्वं यदि वासनामा-धीनमेव(१), तदा गतं बाह्यनीलादिस्वीकारव्य-र्थेति भावः । पूर्वन्यायामिति । प्रत्यक्षलिङ्गशब्दा-नामां तत्र निराकृतत्वात् सहकार्यन्तराभावा-द्यर्थः ॥

न च शशविषाणादिशब्दानामसदर्थैः(२) सह सम्ब-न्धग्रहोऽपि । तथाहि । परबुद्धीनामनुल्लेखात् तद्विषय-

दीधितिः ।

असतो भानासम्भवेन तत्र व्युत्पत्तिविरहं व्युत्पाद्य सत्य-तद्भाने(३) तं(४) व्युत्पादयति । न चेति । परबुद्ध्यादिवि-षयत्वेनोपस्थिते अलीके शक्तिग्रहः, प्रकारान्तरेण वा । आद्ये-ऽपि विशिष्यो(५)पस्थिते, सामान्यतो वा । प्रथमे, परेति । अ-मुमर्थमभिसन्धाय वक्तैनं(६) शब्दं प्रयुक्तवान्, श्रोता वा अ-स्माच्छब्दादमुमर्थं प्रतीतवानित्यादिनिश्चये (हि) सति सङ्केतो-ग्रहः, स च न सम्भवति, परबुद्ध्यादीनामनुल्लेखात् प्रत्यक्षे-

दीधितिटिप्पणी ।

व्युत्पत्तिः सङ्केतग्रहः । मूले, सम्बन्धावगमः शक्तिरूपसम्बन्धा-वगमः । सत्यपीति । तिष्ठत्यपीत्यर्थः, अभ्युपगमवादेन तद्भानाङ्गी-कारेऽपीत्यर्थः । परेति । परोऽत्र प्रयोज्यप्रयोजकवृद्धादिः । अथ परबु-द्धिज्ञानमेवोपयुक्तम्, तदुल्लेखस्य तु न किमपीत्यतोऽनुल्लेखपदार्थ-माह । प्रत्यक्षेणेति । विषयस्याप्यनुल्लेख एवेति मूलं पूरयित्वा व्या-

(१) वासनामात्राधीनं —पुण० पु० पा० । (२) मसमर्थैः —पुण० पु० पा० ।
(३) सत्यपि भाने—पुण० पु० पा० । सत्यपि तद्भाने, असद्भानसत्त्वेऽपि ।—गुणानन्दः ।
(४) तद्विरहं—पुण० पु० पा० ।
(५) परबुद्धीनां सामान्यत उल्लेखसम्भवात् आग्रिमदोषासङ्गतेर्विकल्पयति । विशिष्येति । व्यक्तित्वादिनेत्यर्थः ।—गुणानन्दः । (६) वक्तैवं—कलि० मु० पु० पा० ।

Gurukula Library Kangri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्या(१)प्यनुल्लेख एव । न चार्थक्रियाविशेषोऽ
यतो विषयविशेषमुन्नीय तत्र सङ्केतो गृह्यताम् ।
सङ्केतयितुरेव वचनात् तदवगतिः(२),तद्विषयाणां
वैषां वचनाना(३)मप्रतीतविषयत्वेनागृहीतसम
अप्रतिपादकत्वात् ।

दीधितिः ।

णा(४)ग्रहणात् तद्विषयस्यापि यतोऽनुल्लेखो विशिष्या
इत्यर्थः(५) । अथायमहं गां बध्नामीत्यभिधाय परकी
गां बधानेति वाक्यमाकर्ण्य(६) गां बध्नतो व्यवहारवि
तदीयबुद्ध्यादिविषयविशेषं निर्णीय तत्र गोपदस्य सङ्केत
इव (वा) शशविषाणादिपदस्यापि स्यात् , तत्राह । न चै
उन्नीय परबुद्ध्यादि(७)विषयतया (बुद्धेरित्यर्थः) । सङ्के
सङ्केत(८)ग्राहयितुः वक्तुः श्रोतुर्वा, वचनात् इममर्थमभिस
मयेदं पदं प्रयुक्तं, अस्माच्छब्दादयमर्थो मयाऽवगत
द्याकारात् ॥

दीधितिटिप्पणी ।

चष्टे । तद्विषयस्यापीति । परकीयमिति वाक्यविशेषणम् । श्रो
वचनमत आह । अस्मादिति ॥

(१) ल्लेखात् विषयस्या–पुण० पु० पा० ।

(२) तदवगमः—पाठः । (३) तद्विषयाणां वचनानां सर्वेषा—पुण० पु० पा

(४) प्रत्यक्षेणेति । तस्यैव तत्तद्व्यक्तित्वादिना तद्भाने सामर्थ्यावधारणादिति भावः । तत्तद्व्यक्तित्वेन ।—गुणानन्दः ।

(५) विशिष्यानिर्णयः—पुण० पु० पा० ।

(६) माकलय्य—कलि० मु० पु० पा० ।

(७) परबुद्ध्यादीति । आदिपदाद्व्यवहारविषयत्वादिपरिग्रहः ।—गुणानन्दः ।

(८) सङ्केतं-कलि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

निराकृतमप्यर्थं विशिष्य निराकरणार्थमाह । न चेति । ननु शशविषाणादिपदप्रयोक्तुरवश्यं तद्वि-षय(१)ज्ञानमस्ति, अन्यथा प्रयोगानुपपत्तेरिति श्रोतुस्तत्र सङ्केतधीः स्यादित्यत आह । परेति । तद्बुद्धेः परोक्षतया तद्विषयस्य विशिष्यानवगमादित्यर्थः । ननु प्रयोजकवृद्धोदीरितात् (तु) शशविषाणादिश-ब्दात् प्रयोज्यवृद्धस्य व्यवहारं दृष्ट्वा तटस्थस्य व्युत्प-त्तिः स्यादत आह । न चेति । अर्थक्रिया नयनानय-नादिरूपा । ननु यथा कम्बुग्रीवावानर्थो(२) घटपद-व्यवहारविषय इति यथा सङ्केतग्रह(३)स्तथात्रापि(४) स्यादि-त्यत आह । न चेति । येन पदकदम्बेन सोऽर्थ(५) प्रतिपादनीयः सोऽप्यपरिचितार्थ एवेत्यर्थः ॥

न च शशविषाणशब्द(६)मुच्चारयतः कश्चिदभिप्रायो

दीधितिः ।

द्वितीय(७)माशङ्क्य निराकरोति । न चेति । कश्चित् कि-ञ्चिदर्थगोचरः, अभिप्रायो विकल्पो वा(८) वक्तुः श्रोतुर्वा(९)

दीधितिटिप्पणी ।

द्वितीयम् सामान्यत इति विकल्पम् । सामान्यताबोधनाय न्यूनता-पूरणाय कश्चिदित्यनन्तरं पूरणेनाह । कश्चित् किञ्चिदित्यादि । सामा-

(१) तद्विषयक—पा० २ पु० । (२) कम्बुग्रीवावादिमान्—पुण० पु० पा० ।
(३) इति सङ्केतग्रह—पा० २ पु० । (४) तथात्रापि न—पुण० पु० पा० ।
(५) पदकदम्बेन योऽर्थ-कालि० मु० पु० पा० ।
(६) शशविषाण—कालि० मु० पु० पा० ।
(७) द्वितीयम्, सामान्यतः परबुद्धिविषयत्वेन प्रतीत इति मतम् ।—गुणानन्दः ।
(८) विकल्पो—कालि० मु० पु० पा० । परबुद्धिविषयत्वस्य प्रागभिहितत्वादाह । विकल्पो ।—गुणानन्दः ।
(९) न्यूनत्वमुद्धरति । श्रोतुर्वेति ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वृत्त इति(१) तद्विषयोऽस्य वाच्य इति सुग्रहः
मय इति वाच्यम्। न ह्येवमाकारः समयग्रहः, गां
नेत्युक्ते अप्रतीतशब्दार्थस्या(प्य)भिप्रायमात्रप्रतीतौ
यग्रहप्रसङ्गात । न च विशेषान्तरविनाकृतः कल
मात्रविषयो(ऽस्य) वाच्य इति साम्प्रतम्, घटकूर्म
दीनामपि तदर्थत्वप्रसङ्गात ।

दीधितिः ।

अनुमोदनादिभाजः अस्माच्छब्दात्किञ्चिदर्थप्रत्ययो वृत्त
समयग्रहोऽर्थप्रत्ययाद्यु(२)पयोगी, अभिप्रायमात्रादि(३)
तौ अर्थप्रत्यया(४)द्युपयुक्तसमयग्रहप्रसङ्गात् । प्रकारान्तरे
त्या(५)शङ्क्य निराकरोति । न चेति । वाच्य इति वा
त्सङ्केतग्रह इति(६) साम्प्रतम् युक्तमित्यर्थः । परेषा(
वयविमात्रस्यालीकत्वात् घटेत्युक्तम् ॥

दीधितिटिप्पणी ।

न्यतः सङ्केतप्रत्ययो भवतीत्यर्थः । पूरणमाह । अर्थप्रत्यया
कल्पनाविषयोऽस्य वाच्य इत्यतः किमायातं प्रस्तुतस्य सङ्केत
अतः पूरयति । वाच्य इतीति ॥

कल्पलता ।

ननु शशविषाणादिपदमुच्चारयितुर्यत्र ता

(१) वृत्तः—पुण० पु० पा० ।

(२) ऽर्थप्रत्ययो—कलि० मु० पु० पा० । तादृशाभिप्रायविषयत्वादिना समयग्र
दाह । अर्थप्रत्ययेति । गोत्वादिप्रकारकार्थप्रत्ययेत्यर्थः ।—गुणानन्दः ।

(३) आदिपूरणेन विकल्पमुपगृह्य समुदायार्थं निष्कृष्याह । अभिप्रायमात्रादीति ।—गु

(४) प्रतीत्या—पुण० पु० पा० । (५) प्रकारान्तरेण वाऽलीके शक्तिग्रह इति म

(६) निराकाङ्क्षप्रतिपत्तये पूरयति । वाक्यात्सङ्केतग्रह इतीति ।—गुणानन्दः ।

(७) घटस्य परमाणुपुञ्जमात्रस्य पारमार्थिकत्वादाह । परेषामिति ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

कल्पलता ।

तदर्थ(१) इति सङ्केतग्रहः स्यादित्यत आह । शशविषाणेति । परबुद्धीनामित्यत्र ज्ञानविषय- शङ्कितमिह(२) तु तात्पर्यविषयतयेत्यपौनरु- म् । न ह्येवमाकारः समयग्रहः, शाब्दव्यवहारोप- ीति शेषः । अत्र हेतुमाह । गां बधानेत्युक्त इति । शशविषाणादिशब्दानां विशेषविनाकृतो निरु- ध्योर्थो वाच्य इति सर्वैरेव प्रतीयते, तथा च कथ- सङ्केतो दुर्ग्रह(३) इत्याह(४) । न च विशेषेति । कूर्मरोमादीनामिति । घटरोमकूर्मरोमादीनामित्यर्थः ।)यद्वा यन्मते(६) घटस्यापि काल्पनिकत्वं तन्म- ाश्रित्योक्तम् ॥

न च सर्वे प्रतिपत्तारः स्वस्ववासनयाऽसदर्थश-

दीधितिः ।

स्वस्वे(७)त्यादेः कतरोऽर्थः, किमसतोऽर्थानिव वासना- देव तैः(८) समं तत्तच्छब्दानां सङ्केतं प्रतिपद्यन्ते, किं वासनोपनीतेषु तेषु(९) स्वकृतं तत्तच्छब्दसङ्केतं प्रतिपद्य-

दीधितिटिप्पणी ।

न्यूनताभङ्गायाह । असत इति अर्थानित्यस्य विशेषणम् ।

(१) तदर्थ-कलि० मु० पु० पा० । (२) शङ्कितमिदं-कलि० मु० पु० पा० ।

(३) सङ्केतग्रहो दुःशक-कलि० मु० पु० पा० । (४) इत्यत आह-कलि० मु० पु० पा० ।

(५) इत आरभ्य अग्रिमचिह्नपर्यन्तं कल्पलताग्रन्थो २ पु० नास्ति ।

(६) यद्वा तन्मते-पुण० पु० पा० ।

(७) स च-कलि० मु० पु० पा० । वासना हि स्वविषये ज्ञानं जनयति, तत्र वासनावि- सङ्केतः सङ्केतविषयो वा । आद्ये मूलोक्तदोषासङ्गतेस्तं विकल्प्य दूषयित्वा द्वितीयपरतया सङ्गमयति । स्वस्वेत्यादि ।--गुणानन्दः ।

(८) तैः, असद्भिः ।--गुणानन्दः ।

(९) तेषु, असदर्थेषु । नियामकान्तराभावादाह । स्वकृतमिति । अत एव मूले स्वयं -ति भविष्यतीति भावः ।--गुणानन्दः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्दसम्बन्ध(१)प्रतिपत्तिभाज इति साम्प्रतम्, वार्तानभिज्ञतया अपरार्थत्वप्रसङ्गात् । न हि स्व समय(२)मग्राहयित्वा परो व्यवहारयितुं शक्यते व्यवहारोपदेशावन्तरेण ग्राहयितुमपि । न च धानेतिवत् शशविषाणपदार्थे व्यवहारः, न चाय वश्व इतिवदुपदेशः, न च यथा गौस्तथा गवय वदुपलक्षणातिदेशः, न चेह प्रभिन्नकमलोदरे मधुकरः पिबतीतिवत् प्रसिद्धपदसामानाधिकरण्यम

दीधितिः ।

न्त इति । नाद्यः, शशादिप्रत्येकपदार्थाव्युत्पन्नस्य शश दिशब्दादर्थप्रत्ययप्रसङ्गात् । द्वितीये त्वाह । परस्परेति । कृतसङ्केतस्यान्योन्यमज्ञानेन, परार्थत्वम् परार्थबोधोपयो न स्यादित्यर्थः । तर्हि ग्राह्यतां परोपि सङ्केतमत आह । न उपदेशः प्रवृत्तिनिमित्त(३)विशिष्टे वाच्यताबोधकं वा यथा पिकः कोकिलः, अयमसावश्व इत्यादि । परम्पर सङ्केतग्राहकवाक्यस्याप्युपलक्षकमिदम् । प्रवृत्तिनिमित्तोपल सामानाधिकरण्येन(६) वाच्यताबोधकमुपलक्षणातिदेशः॥

दीधितिटिप्पणी ।

शशादीति। उक्तकारणस्य तदानीमपि सत्त्वादित्यर्थः। परम्परय ग्राहकस्य उपलक्षणातिदेशस्यात्रानुट्टङ्कने पश्चाद्दर्शनमसङ्गतम परम्परेत्यादि । प्रवृत्तीति । प्रवृत्तिनिमित्तोपलक्षणं सादृश्यादि

(१) सङ्केत—पाठः । (२) स्वयङ्कृतसङ्केत—पुण० पु० पा० ।

(३) कल्पनाविषयत्वादिना उपदेशस्य सम्भवादाह । प्रवृत्तिनिमित्तेति ।---गुणानन्द

(४) अतिदेशवाक्यादेरपि परम्परया शक्तिग्राहकत्वात्तदनुक्तौ न्यूनत्वमाशङ्क्याह येति । अत एव न च यथेत्यादिना तयोरपि निरासो भविष्यतीति भावः ।--गुणानन्दः ।

(५) प्रवृत्तिनिमित्तोपलक्षक--पाठः । (६) प्रवृत्तिनिमित्तम्, तदुपलक्षणम्, गोसादृश्यम् । तत्सामानाधिकरण्येनेत्यर्थः ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता।

ननु वासनयैवोपस्थितेऽर्थे श्रोतुः सङ्केतग्रहः स्या-
१.)त्यत आह। न चेति। वक्तृश्रोत्रोः समानस-
ाज्ञानात् परार्थं तत्प्रयोगो न स्यादित्यर्थः।*(२)
यथा घटाभिप्रायेण पटपदमपि प्रयुञ्जीतेति भावः।
स्वयमेव कचिदर्थे सङ्केतं परिकल्प्य शशविषाणा-
ादप्रयोगः स्यादित्यत आह। न हीति। स्वयं सङ्केतक-
ापि परस्य तदज्ञानात् परार्थं प्रयोगानुपपत्तेरित्यर्थः।
शब्दश्चार्थे शङ्कान्तरसमुच्चयार्थः। तर्हि तदर्थे श्रोता-
व्युत्पाद्यताम्, तथा च तदर्थे प्रयोगः स्यादत(३)
ह। न च व्यवहारेति। तर्हि व्यवहारादेव
व्युत्पाद्यतामत उक्तं प्रपञ्चयति। न च गामिति।
र्थे नयनादिव्यवहाराभावादित्यर्थः(४)। तर्ह्युपदे-
देव व्युत्पाद्यतां पर इत्यत आह। न चाग्रमिति।
गोचरशब्दानाम(प्य)गृहीतसमयत्वादित्यर्थः। ननु
क्षादुपदेशासम्भवेऽप्युपमानमनुमानं (वा) द्वारी-
योपदेशः स्यादत आद्यमाशङ्क्य निराकरोति। न च
ति। प्रवृत्तिनिमित्तस्य गवयत्वस्योपलक्षणं गो-
दृश्यं, तदातिदेशस्तत्कथनमित्यर्थः। अनुमानमा-
ङ्क्य निराकरोति। न चेहेति(५)। अयं प्राणी मधु-
शब्दवाच्यः, प्रभिन्नकमलोदरे(६) मधुपानकर्तृ-
ात्, यन्नैवं तन्नैवं यथा घट इत्यर्थः, शशविषाणा-

(१) स्वकीयमानसप्रत्यक्षविषयेऽलीके सङ्केतग्रहः स्यादित्यर्थः।
(२) एतच्चिह्नपर्यन्तं पूर्वचिह्नादारभ्य ग्रन्थो २ पु० नास्ति। शशविषाणपदं यद्यन्यसा-
सङ्केतवत्तया ज्ञानविषयो न स्यात परार्थप्रयोगविषयो न स्यादित्यर्थः।
(३) स्यादित्यत-पुण० पु० पा०। (४) व्यवहितसमयत्वादित्यर्थः--पुण० पु० पा०।
(५) ति। यथेहेति--पुण० पु० पा०। (६) प्रतिकमलोदर—पुण० पु० पा०।

CC-0. In Public Domain.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

दिपदार्थस्य मधुपानादिवदसाधारणार्थक्रिया(१ हादिति भावः(२) ॥

तदमूः शशविषाणादिकल्पनाः(३) नासत्ख्या रूपाः, तथात्वे कारणाभावात्, मूकस्वप्नवदसां व्यावहारिकत्वप्रसङ्गाच्च । तस्मादन्यथाख्यातिरूपा । नैतदनुरोधेना(५)प्यवस्तुनो निषेधव्यवहारगोचरत्वा

दीधितिः ।

उपसंहरति । तदमूरिति । नैतदित्यादि । अपिर्भिन्न शशविषाणादिविकल्पानां विनाऽसत्ख्यातिं दुरुपपादतया नुरोधेनोपेत(त)या तया अवस्तुनि धर्मान्तराभावग्रहात् पि(६) निषेधव्यवहारगोचरत्वमिति नेत्यर्थः, शशा घटत्वादिकं नास्तीति विकल्पानामसत्ख्यातौ कारणाभा न्यथाख्यातित्वध्रौव्यात् । वस्तुन एव निषेधव्यवहारगोचर नावस्तुनः(७), अपिः प्रमाणान्तराभाव(८)समुच्चयायेत्यप्या

दीधितिटिप्पणी ।

भिन्नक्रम इति । यथाश्रुतप्रक्रमातिरिक्तप्रक्रम इत्यर्थः । अ निषेधव्यवहारगोचरत्वं न प्रकृतम्, किन्तु अवस्तुनि इतरस्य व्यवहार इति तथैव भिन्नक्रमं दर्शयन्नाह । शशविषाणेति । असत्ख्यात्या । अपिरिति । न केवलं शशविषाणे घटत्वं ना

(१) दसाधारणक्रिया—कलि० मुं० पु० पा० । (२) विरहादित्यर्थः—पाठः ।

(३) कल्पाः—कलि० मु० पु० पा० ।

(४) मूकस्वप्नवदासां—कलि० मु० पु० पा० । (५) न तदनुरोधेना—पाठ

(६) तस्यापीत्यत्रापिना सतः समुच्चयः । स च दृष्टान्तार्थः ।—गुणानन्दः ।

(७) एवकारव्यवच्छेद्यं स्पष्टयति । नावस्तुन इति ।—गुणानन्दः ।

(८) प्रमाणान्तराभावे-—कलि० मु० पु० पा० । प्रमाणान्तराभावः, असतो निषे गोचरत्वे ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

दीधितिटिप्पणी ।

ट्पत्वेऽपि तत्प्रमाणानुरोधेनावस्तुनो निषेधव्यवहारे गोचरत्वा-
, अपि तु प्रमाणान्तराभावानुरोधेनापि तत्त्वाभावः, तादृशप्र-
ष्यैवाभावादित्यर्थः । अत्रेदं बोध्यम् । प्रमाणान्तरसमुच्चयायेत्येव
त्रतुं योग्यम् , अत्र हि एतदनुरोधेन यन्निषेधव्यवहारगोचरत्वं त-
ित्यर्थः, एवं च तद्वत् प्रमाणान्तराभावानुरोधेन यन्निषेधव्यवहार-
रत्वं तदप्यत्र नास्तीत्युक्तेऽसङ्गतम् , निषेधव्यवहारस्य प्रमाणा-
ाभावानुरोधाजन्यत्वात् । न चाभावादावपि तृतीयार्थसम्बन्धः
एतदनुरोधस्य तादृग्व्यवहारगोचरत्वान्वयित्वात् । तस्मादत्र
नुरोधेनापीत्यनेन प्रमाणाभाव उक्तः, अत एव प्रमाणान्त-
वेति लिखितम् , प्रमाणाभावश्चात्रासत्ख्यातौ कारणाभावरूप
एवं च तृतीयार्थसम्बन्धोऽभावादिनैव बोध्यः ॥

कल्पलता ।

प्रकृतमुपसंहरति । तदमूरिति । न च सर्वे प्रति-
ारः स्वस्ववासनयेत्यादौ दूषणमुक्तं सिंहावलो-
न्या(१)येन प्रकारान्तरेण स्मारयति । मूकेति ।
वप्नेति ।) असत्ख्यातिरूपताव्यतिरेकमुपसंह-
न्यथाख्यातिरूपतामुपसंहरति । तस्मादिति । त-
रोधेनापीति । शशविषाणादिप्रत्ययानुरोधेना-
(२)त्यर्थः ॥

भवतु वाऽसत्ख्यातिः, तथापि न ततो व्यतिरेकः

दीधितिः ।

न ततः तस्मिन्नसति(३), क्रमयौगपद्ययोः सत्त्वस्य च

दीधितिटिप्पणी ।

कुत्र कस्य व्यतिरेक इत्यतः पूरणं कृत्वा पङ्क्तिलिखनमाह । त-
न्नसतीति । असति अलीके । व्यतिरेकशब्देन तादृशसहचारो-

(१) सिंहावलोकितन्या—कलि० मु० पु० पा० । (२) नुरोधेने--पा० २ पु० ।
(३) तत्रेतिसनम्यन्तात्तसिलमनुरुध्याह । तस्मिन्निति ।--गुणानन्दः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रामाणिकः । तथाहि । कोऽयं व्यतिरेको नाम
द्यतो व्यतिरिच्यते तस्य तत्राभावो वा, तदभा
भावत्वं वा ।

दीधितिः ।

व्यतिरेकः विरहः । यतः (अधिकरणात्) व्यतिरिच्यते व्या
ते(१), यद्वृत्तीति यावत् । यत् अधिकरणम्, यतः यद्वृ
व्यतिरिच्यते भिद्यते, तत्र तस्य धर्मस्येत्यन्ये(२) ।
धिकरणमभाव इति मतेनाह । तदभावेति । तस्य
रणस्य(३) ॥

दीधितिटिप्पणी ।

व्युच्यत इत्यत आह । विरह इति । यद्यत इति मूलं
म्भकम्, न तूत्तरपदार्थेन(४) समं तस्य सम्बन्धः,
स व्यतिरेकः कोऽयं नामेति सम्बन्धेनैव मूलमवतरतीति ध्ये
उत्तरतत्पदसम्बन्धितया विकल्प्य पुन(?)र्व्याचष्टे । यत
आत्माश्रयदोषादाह । यद्वृत्तीति । अग्रस्थयत्पदस्याधिकर
तद्वाचकतत्पदमप्यग्र एव युज्यत इत्यतस्तथैवान्वयं दर्शयति
तस्य धर्मस्येति । तत्र अधिकरणे । यत्पदं यद्धर्मपरम्, व्यति
च भेदलक्षणेत्यत्रास्वरसोऽन्य इत्यनेन सूचितः । तदभावेत्यत्र
तत्पदस्य विद्यमानत्वादधिकरणवाचकतत्पदं पूरयित्वा पा
दर्शयति । तस्याधिकरणस्येत्यादि । न चैतत्पूर्वस्थतस्येत्यनु
सामञ्जस्ये किमनेनेति वाच्यम् । तस्य तत्र प्रतियोगिवाच
अत्र त्वधिकरणवाचकत्वं तस्य विरुद्धम् । न चात्रापि तस्य
योगिवाचकत्वमस्तु, तत्पदस्य चाधिकरणवाचकत्वमस्त्विति वा

(१) व्यावर्त्तते—कलि० मु० पु० पा० । पञ्चम्यन्तानुरोधादाह । व्यावर्त्त्यत इति
व्याह । यदवृत्तीति ।—गुणानन्दः ।

(२) अन्य इत्यत्रोदक्षरत्वमस्वरसबीजम् ।—गुणानन्दः ।

(३) अधिकरणस्येति केवलाधिकरणस्वरूपतामभावस्य स्फोरयितुम् ।—गुणानन्द

(४) तूत्तरतत्पदार्थेन—पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिटिप्पणी ।

सति तदभावेत्यस्य तस्याधिकरणस्याभावस्वभावत्वमित्य(र्थः)
(स्)यात्, तदा च प्रतियोगिवाचकतत्पदस्याभावेन सममन्वयो
(न स्)यात्, अभावस्य समासावरुद्धत्वादिति, तस्मात् पूरणमेव
(उचित)मेति ॥

कल्पलता ।

ननु सत्त्वक्षणिकत्वयोः प्रमितत्वात्तद्व्यतिरेकावपि
(प्रमि)तावेव, तथा चाप्रामाणिके(१)प्याश्रये व्यतिरे-
(क)होऽस्तु । यदाह कीर्त्तिः ।

'तस्माद्वैधर्म्यदृष्टान्ते नेष्टोवश्यमिहाश्रयः ।
तदभावेऽपि तन्नेति वचनादेव तद्गतेः ॥'

इति, अतोऽभ्युपगम्यापि निरस्यति । भवतु वेति ।
(अ)सत्ख्यातिः, आश्रयांशे । यद्वा ननु नैयायिकै-
(ः) शुक्तिरजततादात्म्यस्यासत एव भानमङ्गीक्रि-
(यते), इत्यत आह । भवतु वेति । यद्यपि शुक्तौ रजतं
(तादा)त्म्यं च(२) तत्र भासते, तच्च सर्वं सदेव, न
(चास)द्विषयत्वं भ्रमत्वे(३) तन्त्रम्, किंतु प्रकारवैयधि-
(करण्)यमात्रम्(४), तथापि सदुपरक्तमसदपि(५) भा-
(ति) इति पक्षेऽभ्युपगमवादोऽयम् । न तत इति । न
(इ)त्यर्थः । यद्यतो व्यतिरिच्यत इति । व्यतिरिच्यते
(इष्)यते । यथा भूतलाद्भिन्नस्य(६) घटस्याभावो (न)
(स्थ)ल इति स्वमते । प्राभाकरमते त्वाह । तदभावेति ।
(तदा) च भूतलादेरधिकरणस्यैव घटा(द्य)भाव(स्व)रू-

(१) तथा च प्रामाणिके-पा० २ पु० । (२) शुक्तिरजततादात्म्यं च-कालि० मु० पु० पा० ।
(३) न चासद्विषयत्वमप्रमात्वे--पुण० पु० पा० । न चासद्विषयत्वं तत्र- पा० २ पु० ।
(४) विशेष्यावृत्तिप्रकारकत्वमित्यर्थः । (५) सदुदरक्तमसद्रि-कालि० मु० पु० पा० ।
(६) भूतलाभिन्नस्ये --पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

पत्त्वमित्यर्थः । अधिकरणाभिन्नो वाऽभावो(१) करणस्वभावो)ऽधिकरणस्वरूपं वेति विकल्प अपव्याख्यानमन्यत् । उक्तिरेतादृशी परनयेन

तत्र न तावत् क्रमयौगपद्ययोः शशविषा भावः प्रमाणगोचरः, वृक्षरहितभूभृत्कटकवत् क्र पद्यरहितस्य शशविषाणस्य प्रमाणागोचरत्वात् ।

दीधितिः ।

क्रमेति । अर्थक्रियानुकूलक्रमयौगपद्ययोः(२) । क्र सत्त्वस्याप्युपलक्षकम्(३) । एवमग्रेऽपि ॥

दीधितिटिप्पणी ।

न्यूनत्वमाशङ्क्याह । क्रमादिकमिति ॥

कल्पलता ।

न तावदिति । पर्वतनितम्बे यथा वृक्षाभाव ग्यानुपलम्भेन गृह्यते, न तथा व्यतिरेकग्रहः सम्भवतीत्यर्थः ॥

नापि क्रमयौगपद्याभावरूपत्वं(४) शशविष प्रामाणिकम्, घटाभाववच्छशविषाणस्य प्रमाणेना

दीधितिः ।

घटाभाववदिति व्यतिरेके(ण) दृष्टान्तः । तस्यासि

(१) अधिकरणाभिन्नाऽभावो-पा० २ पु० ।

(२) कस्य क्रमयौगपद्ये इत्याकाङ्क्षायामाह । अर्थेति । अर्थक्रिया, कार्यम् । सहकारिसमवधानम् ।—गुणानन्दः ।

(३) ध्युपलक्षणम्-कलि० मु० पु० पा० । (४) भावकत्वं—पुण० पु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ात् । घटाभावोऽपि न प्रमाणगोचर इति चेन्न ।
स्य तद्विविक्तेतरस्वभावस्यापि प्रमाणत एव सिद्धेः,
सिद्धौ वा तत्राप्यव्यवहार एव ।

दीधितिः ।

(१) । घटाभावोपीति । तथा च पक्षः स्थिरो भाव इव सपक्षो
पक्षश्चाप्रामाणिक एवोपयुज्यत इति(२) (भावः) । तद्विवि-
क्तेतरेति । तद्विविक्तः तद्भिन्नः, तदितरस्वभावस्य । प्रतियोगि-
(३)दभावस्याप्यतद्व्यावृत्तस्वभावस्य प्रमाणसिद्धत्वादित्यर्थः,
च(४) केवलमधिकरणमन्यो वेत्यन्यदेतदिति भावः । तत्रा-
घटाभावेऽपि(५) ॥

दीधितिटिप्पणी ।

तस्य तद्विविक्तेत्यादि मूलम्, अत्र तस्येति व्याधिकरणषष्ठ्या
दृष्टान्तार्थमाह । प्रतियोगिवदिति ॥

कल्पलता ।

द्वितीयं निरस्यति । नापीति । स्यादेवं यदि श-
विषाणे क्रमयौगपद्याभाव इति प्रतीतिः केनापि
माणेन स्यात्, न त्वेवमित्यर्थः । घटाभाववदिति
तिरेकदृष्टान्तः । अधिकरणस्वभावत्वेऽप्यभावस्य प्र-

(१) तस्य, व्यतिरेके दृष्टान्तस्य । असिद्धिम्, अभावम् । व्यतिरेकिदृष्टान्तस्य भेदं वा ।—गुणानन्दः ।

(२) तथा च पक्षः स्थिरो भाव इव सत्त्वादिरप्यप्रामाणिक उपयुज्यत इति-कलि० मु० पु० । तथा च व्यावृत्तिरिव सपक्षो विपक्षोऽप्यप्रामाणिक उपयुज्यतामिति—पुण० पु० पा० । तथा च व्यावृत्तिरिव सपक्षो विपक्षोऽप्यप्रामाणिक उपयुज्यतामिति—गुणानन्दः । तथा चेति । मास्तु भावस्तथा, दृष्टान्तोऽभाव एव भविष्यतीत्यभिसन्धाय मूलयुक्तिमाह । तथा चेति । च यत्र व्यतिरेकोपासना तत्राभावस्याप्रामाणिकत्वेपि यथा प्रमाणप्रवृत्तिस्तथा पक्षादेरपि त्वे स्यादिति भावः ।—गुणानन्दः ।

(३) तद्विविक्तेतरस्वभावस्यापीत्यपिना प्रतियोगी समुचितो दृष्टान्तार्थमित्यभिप्रेत्याह । प्रतियोगिवदिति । अपिः समुच्चये ।—गुणानन्दः ।

(४) प्रमाणसिद्धत्वाच- कलि० मु० पु० पा० ।

(५) प्रतियोगिरस्वधर्मं निराकरोति । घटाभावेपीति ।—गुणानन्दः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

तीतिरेतादृश्येवाभ्युपेयेति भावः । ननु यथा प्रम
षयस्यापि घटाभावस्य व्यवहारः सर्वजनीनस्त
क्रमयौगपद्याभावव्यवहारोपि स्यादित्यभिप्रा
शङ्कते । घटाभावोपीति । परिहरति।(३)
ति । घटविविक्तम् घटभिन्नम् , भूतलादि, तद्
क्तस्वभावस्य, घटाभावस्येत्यर्थः । यथाधिकरणा
घटाभावः प्रत्यक्षत(४) उपलभ्यते, नैवं क्रम
द्याभाव इति भावः । ननु भूतले घटो ना
प्रतीतिरप्यसत्ख्यातिरेवेत्यत आह । असिद्धौ वे
तत्रापि घटाभावेपि । प्रमितस्यैव व्यवहार्यत्व
भावः(६) ॥

घटस्तावत् स्वाभावविरहस्वभावः प्रमाण

दीधितिः ।

असिद्धे(७) व्यवहाराभाव इति सत्यम् , अ
प्रतियोगिनः स्वाभावविरहस्वभावस्य सिद्धयैव सिद्ध(म्)

दीधितिटिप्पणी ।

घटस्तावदिति मूले केवलघटाभावस्य प्रमाणसिद्धत्वं
नभीष्टमेव व्यवस्थाप्यते, अतो घटाभावमुपलक्षणं कृत्वा अ
त्रस्य व्यवस्थापनाभिप्रायेण भावं ददाति । असिद्ध इत्यादि
ताद्रूप्येणं तस्यानुपलम्भेपि तदभावस्वभावतायां तन्न

(१) स्तथा च-पुण० पु० पा० । (२) स्यादिति-पुण० पु० पा० ।
(३) घटाभावोपीति ।—पा० २ पु० । (४) प्रतिपक्ष—पुण० पु० पा० ।
(५) असिद्धाविति—कलि० मु० पु० पा० ।
(६) ननु भूतले घटो नास्तीति प्रतीतिरिति भावः ।—पा० २ पु० ।
(७) अप्रासिद्धे-पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूप्येण कदाचिदप्यनुपलम्भात्, एतावतैव तदभावो-
घटविरहस्वभावः सिद्ध इति चेन्न । घटाभावस्य(१)
भाव विरहस्वभावत्वानभ्युपगमात् ।

दीधितिः ।

ते । घटस्तावदिति । ताद्रूप्येण स्वाभावरूपत्वेन(२), तथा च रुद्ध(३)स्वभावः प्रतियोग्येव तदभावः, प्रतियोगिसत्त्व-(४) कदाचिदप्यभाववत्त्व(५)स्याव्यवहारात् । घटाभा-पि घटाविरहस्वभावः सिद्ध इत्यत्र तन्मत(६)विरोधमाह । घटा-वस्येति(७) । तदभावो घटः, (तद्विरहः तदभावः, तथा च) भावस्य घटविरहस्वभावतायास्त्वयानभ्युपगमात् , अभाव-स्यैव निःस्वभावतया त्वया(८) तुच्छत्वाभ्युपगमात् । घटभा-वेति(९) पाठे तु घटरूपस्य (स्व)भावस्य स्वाभावविरहत्वान-गमादित्यर्थः, प्रतियोगिनः स्वाभावविरहात्मत्वे प्रामा-के अभावप्रामाणिकताया आवश्यकत्वादिति भावः ॥

दीधितिटिप्पणी ।

। तथा च तद्विरुद्धस्वभाव इति । तदभावोपीत्यादौ एतावतैवेति सङ्गतः, (अतः) स्वयं हेतुदानेन एतद्ग्रन्थव्याख्यामाह । प्रयोगिसत्त्वग्रह इति । इत्यत्रेति । अतिसन्निहितोक्त इत्यर्थः । त-म् क्षणिकतावादिमतम् । एतच्च घटतदभावस्येति मूले पाठो तीत्यभिप्रायेण, अत एव घटाभावस्येति धृतम् । तुच्छत्वेति । च निःस्वभावत्वे कथं विरहस्वभावत्वमित्यर्थः । ननु घटस्य भावविरहात्मकत्वा(न)भ्युपगमेपि तदभावस्य प्रामाणिकत्वे कि-तं, येनैतद्दोषदानं सङ्गतं स्यादत आह । प्रतियोगिन इति ॥

(१) घटभावस्य—कलि० मु० पु० पा० । (२) एतच्च बाधकापसारणपरम्, तस्य रूपत्वे स्वाधिकरणेपि तदुपलम्भात् तद्विरहत्वं तस्य न सिद्ध्येदिति भावः । केचित्तु तत र्मो यस्येति व्युत्पत्त्या तद्रूपं तदधिकरणम्, तद्धर्मत्वेनेति च भावप्रत्ययलभ्यम्, तथा च रणधर्मत्वेन कदाचिदप्यनुपलम्भादित्यर्थमाहुः ।-गुणानन्दः । (३) तथा च विरुद्ध-पुण० ० । (४) प्रतियोगिसत्त्वग्रहे-कलि० मु० पु० पा० । (५) दप्यभाव-कलि० मु० पु० पा० । तन्मतेति च तेषामेवाभावे निःस्वभावतोपगमादित्यर्थः ।-गुणानन्दः । (७) घटभावस्येति-मु० पु० पा० । (८) निःस्वभावरूप-पुण० पु० पा० । (९) घटाभावस्येति —कलि० ० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

*प्रमाणाविषयस्यापि घटाभावस्य व्यवहार
पपादयति । घटस्तावदिति । ताद्रूप्येणेति । स्व
रूपतयेत्यर्थः(१), न हि भवति घटाभाव एव घट
प्रतीतिरिति भावः ।*(२) घटविरहस्वभावः
इति । न तु स्वातन्त्र्येण प्रमित(३) इति रहस्यम्
भिसन्धिराह । घटभावस्येति(४) । कचिद्घटा
स्येति पाठः, स च घटश्चासावभावश्चेति कथं
पपाद्यः । अभावस्याप्रामाणिकत्वे घटस्य स्वाभा
रहस्वाभाव्य एव(५) विप्रतिपद्यामहे इति भाव

न चान्यस्य स्वभावे प्रमाणगोचरे तदन्
सिद्धः स्यात्, अतिप्रसङ्गात् । एवम्भूतावेव घट
भावौ यदेकस्य परिच्छित्तिरपरस्य(६) व्यवच्छित्ति

दीधितिः ।

अपि च घटस्य घटस्वभावत्वेन सिद्ध्यैव(७) तदभ
सिद्धिः, स्वाभावाविरहस्वभावत्वेन सिद्ध्या वा । आद्ये, न
स्वभावभेदस्य नियामकत्वान्नातिप्रसङ्ग इत्याशङ्कते । एवम्भू
ति । एवंस्वभावा(८)विसर्थः । परिच्छित्तिः निश्चयः,

दीधितिटिप्पणी ।

स्वभावभेदस्येति । ईदृश एव कश्चित् स्वभावभेदोऽस्तीत
अभावस्य स्वभावभेदप्राप्तौ ग्रहः । ? एवंस्वभावाविति । एवंप

(१) ताद्रूप्येणेति । अभावस्वरूपतयेत्यर्थः—पुण० पु० पा० ।
(२) * एतच्चिन्हाङ्कितः पा० २ पु० नास्ति।
(३) प्रमिति—पुण० पु० पा० । (४) घटाभावस्येति—पा० २ पु० ।
(५) स्वाभाव्यस्य—कलि० मु० पु० पा० । (६) परिच्छित्तिरेवापरस्य—पुण०
(७) सिद्ध्यैव-कलि० मु० पु० पा० । (८) स्वभावो-कलि० मु० पु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

। घटवद्घटाभावस्यापि प्रामाणिकत्वानभ्युपगमे भाववादानवकाशात्(१)। प्रमाणसिद्धे हि (वस्तुनि) भावा(२)वलम्बनम्, न तु स्वभाववादावलम्बनेनैव व-

दीधितिः।

त्तिः अभावावधारणम्, तथा च घट(३)परिच्छित्तौ स्वाभाव-श्चीन्येन(४) घटाभावोपि सिद्ध इत्यर्थः(५)। निराकरोति। घट-ति। व्यतिरेके दृष्टान्तः। स्वभावेति। निःस्वभावत्वेनाभ्युप-(६) अभावे सस्व(७)भावत्वाभ्युपगमविरोधादिति(८)। अथ एवै(९)तादृशस्वभावो यदेतस्य परिच्छित्तिरेवै(१०)तदभा-व्यवच्छित्तिरिति चेत्, भावपरिच्छित्तेस्तदभावव्यवच्छित्तिरूपता-

दीधितिटिप्पणी।

प्राप्तिः। तैरश्चीन्येति। घटपरिच्छित्तेर्घटाभावनिर्णयरूपतया भावस्य स्वभावस्य स्वभावे विशेषणीभूततया विशिष्टासिद्धेवा-सिद्धिरित्यर्थः। ?(११) इदमेव तैरश्चीन्यम्, तिर्यक् अमुख्यः, यतो मुख्यतया इतरासिद्धौ(१२) स्वस्यापि गुणभावेन। सर्वत्र चाभ्युपगमः तन्मतेनाभ्युपगमो बोध्यः। एवंस्व-भावित्यादिनाऽभावस्यापि सस्वभावत्वपुरस्कारेण उक्तं निःस्वभा-वेन दूषितं भवतु, इदानीं मया भावस्यैव (स)स्वभावत्वदर्शनपुर-स्कारेण तदभिधाने को दोष इत्यभिप्रेत्याह। अथ भाव एवेत्यादि।

(१) घटाभावस्य प्रामाणिकत्वं त्वया नाभ्युपगम्यते, एवं च सस्वभावत्वस्वीकारोऽयुक्त इत्यर्थः।
(२) स्वभाववादा—कलि० मु० पु० पा०। (३) घटा—कलि० मु० पु० पा०।
(४) तैरश्चिन्येन—कलि० मु० पु० पा०। स्वाभावतैरश्चीन्येन, स्वाभावाभावत्वेन। घटपरि-निश्चये। स्वाभावोपि, घटाभावोपि। सिद्धः, विषयीकृतः।—गुणानन्दः।
(५) भावोपि प्रसिद्ध इति भावः—पुण० पु० पा०। (६) भ्युपगमात्—कलि० मु० पु० पा०।
(७) सत्स्व—पुण० पु० पा०। (८) विरोध इति भावः—कलि० मु० पु० पा०।
(९) भाव एवेति। तथा चाभावस्य निःस्वभावत्वोपगमेपि न क्षतिरिति भावः।—गुणानन्दः।
(१०) रेव—कलि० मु० पु० पा०।
(११) ? एतच्चिन्हाङ्कितो ग्रन्थ आदर्शपुस्तके नास्ति।
(१२) मुख्यतया इतरासिद्ध इत्यादर्शपुस्तके पाठः। मुख्यतयाऽसिद्धस्य—पा० २ पु०।

CC-0. In Public Domain

स्तुव्यवस्थितिरिति हि(१) भवतामेव तत्रतत्र जय...

दीधितिः ।

याः प्रामाणिकत्वे तदभावस्यापि प्रामाणिकत्वमव(२)...

दीधितिटिप्पणी ।

तदभावस्यापीति । उक्तैतरश्रौन्येनेत्यर्थः, तथा च तदनभ्यु... पूर्वोक्तो दोष इत्यर्थः ॥

कल्पलता ।

दोषान्तरमाह । न चेति । तथा च ... प्रवर्त्तमानं प्रमाणं कुम्भमपि साधयेदित्यर्थः ... तिप्रसङ्गं परो व्युदस्यति । एवम्भूतावेवेति ... तियोगिनि प्रवृत्तं प्रमाणमनुयोगिनमपि ... करोति, अत्र प्रतियोग्यनुयोगिभाव(३) एव नि... इति नातिप्रसङ्गो न वाऽभावस्य स्वतन्त्रप्रमा... यत्वमिति भावः । घटवदिति व्यतिरेके(४) दृष्टभाववि... स्वभावो हि स्वरूपम्, तच्च निःस्वरूपस्य(५) ... पथानवतीर्णस्य(६) न सम्भवतीत्यर्थः । त्वयाप्रामाणिक... णसिद्ध एव स्वभावावलम्बनमङ्गीकर्तव्यमित्याशयः(... प्रमाणसिद्धे हीति ॥

तत् किमिदानीं स्वाभावविरहस्वभावो घटः...

दीधितिः ।

द्वितीयं(७) शङ्कते । तत्किमिति । तथा च घटशून्य...

दीधितिटिप्पणी ।

ईदृशरूपेणासिद्धौ को दोषः, अत आह । तथा चेति । प...

(१) वस्तुसिद्धिरिति-कलि० मु० पु० पा० । (२) त्वम- कलि० मु० पु०...
(३) नुयोगीभाव-कलि० मु० पु० पा० । (४) व्यतिरेक-कलि० मु०...
(५) तत्त्वानिरूपितस्य-पा० २ पु० । (६) पथावतीर्णस्य-पा० २...
(७) द्वितीयम, स्वाभावविरहस्वभावत्वेन सिद्ध्या वेति मतम् ।—गुणानन्दः ।

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्रैव सिद्धः । तत्र दृष्ट्या एवमेतत् । घटो हि यादृ-
ादृक्स्वभावस्तावत् प्रमाणपथमवतीर्णः, तस्य तु
परमार्थतोऽभावोऽपि कश्चित् स्यात्, स्यात् परमार्थतः
ऽपि तद्विरहस्वभाव इति तथैव प्रमाणेनावेदितः स्यात्।
चैतदप्य(१)भ्युपगम्यते भवता । तस्माद् घटवत्
भावस्यापि प्रामाणिकत्वेनैवानयोः परस्परविर-
क्षणव्यतिरेकसिद्धिः, अप्रामाणिकत्वे त्वनयोरपि

दीधितिः ।

पि घटाभावव्यवहारप्रसङ्ग इति भावः । निराकरोति ।
याादि(२) । तदेव व्युत्पादयति । घटो हीति । यादृगिति ।
ाणुपुञ्जोऽवयवी वेति(३) । सोऽपि घटोऽपि । तद्विरहस्वभावः
(४) दृष्टभावविरहस्वभावः । तथैव स्वाभावविरहस्वभावत्वेनैव ।
(५) (स्य स्वाभावविरहात्मकतायाः प्रामाणिकत्वे चा(४)भाव-
ाणिकत्वध्रौव्यात् । अनयोः घटतदभावयोः । व्यतिरेकः
धः(५) । तदीयत्वेनैव च निरूपणे तज्ज्ञानमपेक्ष्यते नान्यथेति

दीधितिटिप्पणी ।

ावः स्यात् तदैव भावस्य स्वाभावविरहस्वभावः, पारमार्थिक
किं मानमत आह । भावस्येति । पौनरुक्त्यादाह । व्यतिरेक
। ननु यद्येतौ परस्परविरहलक्षणौ तदा कथं स्वाभावविरह-
स्य भावस्य (अभाव)ज्ञानं विना ज्ञानमत आह । तदीयत्वेनेति।

(१) न चैतद—कालि० मु० पु० पा० । (२) तदेत्यादि—कलि० मु० पु० पा० ।
(३) ऽवयवी चेति—कालि० मु० पु० पा० । (४) प्रामाणिकत्वे वा—कालि० मु० पु० पा० ।
(५) विरोध इति । तथा च परस्परविरहलक्षणेत्यस्य परस्परविरहयोर्लक्षणं परस्पराविरहत्वम्,
विरोध इत्यर्थोऽवसेयः । ननु घटस्य स्वाभावविरहरूपत्वे विना प्रतियोगिज्ञानं तज्ज्ञानं
इत्याशङ्कायामाह । तदीयत्वेनेति ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न तथाभाव इति । शशविषाणादिष्वपीयमेव गति

दीधितिः ।

विनाऽप्यभावज्ञानं तदभावात्मनो भावस्य निरूपणं नानुप

दीधितिटिप्पणी ।

अभावीयत्वेनेत्यर्थः । संसर्गः प्रतियोगिता ॥

कल्पलता ।

तत्किमिति । तथा सति स्वाभावात्मैव(१)
स्यादिति साक्षेपाभिधानाभिप्रायः(२) । तव दृष्ट
दृष्टिः दर्शनम् । त्वद्दर्शने चेदभावो न प्रामाणि
दा तद्विरहस्वभावो घटोऽपि न प्रामाणिकः स
त्यर्थः । यादृक्तादृक्स्वभाव इति(३) । अवयवी
माणुस्वरूपो वेत्यर्थः । तथैवेति । स्वाभाव(४)विर
भावत्वेने(५)त्यर्थः । उभयोः प्रामाणिकत्वमुपसंह
तस्मादिति । अनयोः घटतदभावयोः । न चा
रन्योन्यापेक्षायामन्योन्याश्रयः, घटत्वेन घटे गृ
णे तद्विरहानपेक्षणात्, तद्विरहस्यापि प्रमेयत्वा
ज्ञाने(६) घटा(७)नपेक्षणादिति भावः । न
भाव इति । नान्योन्यविरहस्वभावत्वमित्यर्थः
शविषाणादिष्वपीति । शशविषाणादीनां प्राम
कत्वे परं तत्र(८) क्रमयौगपद्यविरहानिरूपणं, न
थेत्यर्थः, तथा च प्रमाविषयस्यैव व्यवहारविष
मिति(९) यदुपक्रान्तं(१०) तत्सिद्धमिति भावः ॥

(१) स्वाभावाभावो नैव—कालि० मु० पु० पा० । (२) साक्षेपपराभिप्रायः—कालि० मु०
(३) यादृच्छिकस्वभाव इति—पा० २ पु० । (४) स्वभाव-पुण० पु० पा० ।
(५) स्वभावे-पा० २ पु० । (६) भाने—पाठः । (७) घट—कलि० मु० पु० पा
(८) परतन्त्र-कलि० मु० पु० पा० । (९) विषयत्वादिति-कलि० मु० पु० पा० ।
(१०) यदुपसङ्क्रान्तं—पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु कालपनिकरूपसम्पत्तिरेवास्त्वनुमानाङ्गम् ।
न । तस्याः सर्वत्र सुलभत्वात् ।

दीधितिः ।

रूपम् सपक्षसत्त्वादि । तस्याः कालपनिक(१)रूपसम्पत्तेः । अत्र अनैकान्तिकासिद्धविरुद्धेषु त्वदनुमतेषु हेत्वाभासेषु ॥

दीधितिटिप्पणी ।

वक्ष्यमाणतदिहेत्यादिमूलेन एवं सति व्यभिचारिस्वरूपासिद्धसद्धानामेवातिव्याप्त्युद्धरणस्य करिष्यमाणत्वात् तत्रैवातिव्याप्तिर्यति । सर्वत्रेति ॥

कल्पलता ।

ननु सत्त्वक्षणिकत्वयोर्व्यतिरेकः कल्पनया तावत्प्रतीतः, एतावतैव तदनुमानं प्रवर्त्तताम्, किं व्यतिरेकस्य प्रामाणिकत्व(२)ग्रहेणेत्याह । नन्विति । पर्वतो वह्निमान् प्रमेयत्वात्, महानसवत्, शब्दोऽनित्यश्चाक्षुषत्वात्, घटवत्, नित्यः शब्दः कृतकत्वादित्यत्र व्यभिचारासिद्धिविरोधानां यथाक्रमं हेत्वाभासतयाऽसाधकत्वं त्वया यदुच्यते, तदपि न स्यादित्याह । तस्या इति। कालपनिकरूपसम्पत्तेः, सर्वत्र उदाहृते(षु), सुलभत्वादित्यर्थः ॥

(१) तस्याः कल्पनाया इति भ्रमं निराकरोति । कालपनिकेति । सद्धेतुषु कालपनिकया- या अभावादाह । अनैकान्तिकेति । विपक्षासत्त्वपक्षसत्त्वसपक्षसत्त्वानां तेषु कल्पना क्रमेण । अबाधितत्वासत्प्रतिपक्षितत्वयोर्ज्ञानं नाङ्गमिति तदुभयमुपेक्षितम् ।—गुणानन्दः ।
(२) व्यतिरेकस्य अप्रामाणिकत्व—पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु पक्षसपक्षविपक्षा(१)स्तावद्द्वस्त्ववस्
द्विरूपाः,तत्र ये कल्पनोपनीतास्तत्र काल्पनिका ए
धर्मत्वा(२)न्वयव्यतिरेकाः,प्रमाणोपनीतेषु तु प्राम
एवेति विभागः । तदिह(३) काल्पनिकान्निरप्र
प्रमेयत्वादेर्व्यावृत्तिः काल्पनिकी सिद्धा,
प्रामाणिकाज्जलह्रदादेः प्रामाणिकयैवैषितव्या,
न सिद्धेति कुतस्तस्य हेतुत्वम् । एवं
णिके शब्दे पक्षीकृते प्रामाणिक एव हेतुस

दीधितिः ।

तत्र तेषु द्विरूपेषु पक्षादिषु मध्ये, तत्र तेषु काल्प
क्षसपक्षविपक्षेष्विति, तथा चा(४)सत्त्वे साध्ये काल्पनि
पक्षसपक्षयोः स्थिरभावशशशृङ्गयोः काल्पनिकमेव क्रम
द्धविरहस्य हेतोः सत्त्वम्, क्षणिकत्वे च साध्ये सत्त्वस्य
निके(५) शशशृङ्गादौ विपक्षे काल्पनिक एव व्यतिरेको
कतौपयिकं(६) रूपमिति भावः । तदिह वह्नौ साध्ये ।

दीधितिटिप्पणी ।

असत्त्वे साध्य इत्यादि । क्षणिकत्ववादिभिर्वास्तविकः
नाङ्गीक्रियते, अतः काल्पनिक एव तन्मते स्थिरः, एवं च
क्षणिकत्वे साध्ये काल्पनिकस्थिरे सत्त्वस्यानैकान्तिकत
काल्पनिकस्थिरं पक्षीकृत्य सत्त्वस्याभावः साध्यते, तत्र च क्र
विरहो हेतुः । क्षणिकत्व इति । तदनन्तरमित्यादिः । तस्याः स

(१) पक्षाविपक्षसपक्षा–पुण० पु० पा० । (२) पक्षधर्मा–कलि० मु० पु० पा० ।
(३) बौद्धानामनैकान्तासिद्धविरुद्धास्त्रयो हेत्वाभासास्तत्र क्रमेण काल्पनिकरूपप्र
मकत्वमाह । तदिहेति ।—भगीरथठक्कुरः ।
(४) एतावता प्रकृते यदायातं, तदाह । तथा चेति ।—गुणानन्दः ।
(५) काल्पनिक—कलि० मु० पु० पा० । (६) पायिक—कलि० मु० पु० पा०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यः, न चासौ चाक्षुषत्वस्यास्तीति सोऽपि कथं
: । एवं कृतकत्वस्यापि वस्त्वेकनियतस्य धर्मस्य
तत्र एवान्वयो वक्तव्यः, वस्तुनो विपक्षाच्च वास्तव
व्यतिरेकः, न च तस्य तौ स्तः, तत् कथ-
ावपि हेतुरिति ।

दीधितिः ।

रुया(१)नित्यत्वे साध्ये । एवम् नित्यत्वे साध्ये । वस्त्वेक-
तस्येति वस्तुमात्रधर्मस्यावस्तुनि नित्येऽलीकेऽन्वयो वि-
त् कल्पयितुं न शक्यत इति सूचनाय ॥

दीधितिटिप्पणी ।

वादिति दत्तं व्यभिचारिण्यतिप्रसङ्गमुद्धरति, तदिहेति मूलम्(२)।
अलीके नित्यरूपे अलीके, तथा च तत्र सामानाधिकरण्येन
धभङ्गो न भवतीत्यर्थः ॥

कल्पलता ।

ननु निरग्निकात् कूर्मरोमादेर्विपक्षात् प्रमेयत्व-
वृत्त्या विपक्षाद् व्यावृत्तिः(३) काल्पनिके (शब्दे)
क्षुषत्वसत्त्वेन पक्षसत्त्वं काल्पनिके नित्ये गगनार-
न्दे(४) कृतकत्वसत्त्वादन्वयो नित्यत्वकृतकत्व-
रिति काल्पनिकी रूपसम्पत्तिर्यथा त्वयोच्यते,
ा ह्रदे विपक्षे(५) प्रमेयत्वस्य सत्त्वाद्विपक्षगामित्वं
तत्र शब्दे चाक्षुषत्वस्यासत्त्वादपक्षवृत्तित्वं नित्ये

(१) एवं शब्दस्येति । चाक्षुषगुणत्वमत्र हेतुरनुसन्धेयः । —गुणानन्दः ।
(२) मूलम् । वस्त्येकनियतेत्यस्य सूचनायेत्यर्थं च यः । —पा० २ पु० ।
(३) विपक्षव्यावृत्तिः—पुण० पु० पा० । (४) गगनादावरविन्दे—पुण० पु० पा० ।
(५) विपक्ष—पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

वस्तुनि कृतकत्वस्यावृत्तेर्विरुद्ध(१)त्वमत
(हेतूनां) कथं गमकत्वं स्यादि(२)त्याशङ्कते । ननि

प्रलपितमेतत् । न हि नियामकमन्तरेण
दं प्रति कल्पना त्वरते, विपदं प्रति (तु) विलम्ब
शक्यं वक्तुम् , तथा च निरग्निकमपि कूर्मरोम
मामिति कल्पनामात्रेण विपक्षवृत्तित्वात् धूमोऽपि
गमयेत् । वास्तव्यां रूपसम्पत्तौ किमनेन काल्प
दोषेणे(३)ति चेत्, तर्हि वास्तव्यामसम्पत्तौ किं
निकया तयेति समानम्। विरोधाविरोधौ विशेष इति

दीधितिः ।

तर्हीत्यादि(४) । रूपस्य असम्पत्तौ(५) । तया
म्पत्त्या । असति विपक्षे सतो धूमस्य सत्त्वं कल्प
शक्यते, विरोधात्, शक्यते पुनरसतोः पक्षसपक्षयो(६)
क्रमादिविरहस्य सत्त्वं, सतोपि च सत्त्वस्यासति शशशृङ्गे

दीधितिटिप्पणी ।

विपदं प्रत्यपि त्वरतामिति दर्शयति, तथा च निरग्नि
मूलम् । विरोधात् साक्षात्सम्बन्धविरोधात् । सत्त्वस्यापि
वृत्तित्वं दर्शयति । सतोपि चेति । उभयोरित्यादिमूलेन वि
पविशेषो धूमवन्हिस्थले दर्शितः, अन्यत्रेत्यादिना प्रकृतेऽ
दर्शित इति । वस्त्ववस्तुत्वादिति यथासङ्ख्यं धूमशशशृङ्ग

(१) त्वस्यासत्त्वाद्विरुद्ध—पुण० पु० पा० । (२) गमकत्वामि—पुण० पु० पा०
(३) काल्पनिकदोषेणे-पुण० पु० पा० । (४) तर्हीति—पुण० पु० पा०
(५) असम्पत्त्यै-पुण० पु० पा० । असम्पत्तेर्निरूपकाकाङ्क्षायामाह । रूपस्येति ।-गु
(६) पक्षसपक्षयोः, स्थिरभावशशशृङ्गयोः ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

...एषः(१)। उभयोरेकत्र वस्त्ववस्तुत्वात्, अन्यत्रावस्तु-
...दिति चेत्, तत् किं काल्पनिकोऽपि धूमो वस्तुभूतो येन
...रोम्ण(२)स्तेन सह विरोधः स्यात्। क्वचिद्वस्तुभूत
...(३) चेत्, निर्धूमत्वमपि क्वचिद्वस्तुभूतमिति तेनापि

दीधितिः।

...तिरेकः, अविरोधादित्याह। विरोधेति। कुत एषः विशेषः, ...धोऽविरोधश्चेति(४)। एकत्र धूमेन वह्नौ साध्ये। उभयोः ...शशशृङ्गयोः। अन्यत्र क्रमादिविरहेणासत्त्वे सत्त्वेन क्षणि... वा पक्षहेत्वोः, हेतुसपक्षयोः, विपक्षहेत्वभावयोश्च। यादृशं(५) ...वद्वस्तुभूतम्, तादृशं यद्य(वस्तुभूतमप्य)वस्तुनि कल्पयितुं न ...यते, तदा निर्धूमत्वं क्वचिद्वस्तुभूतमित्यवस्तुभूतमपि तदव... ...नि न कल्प्येत(६), वास्तवं तु सुतरामशक्यकल्पनमिति ...ल्पनिकविपक्षव्यतिरेकविरहात् धूमो नाग्निं(७) गमयेदित्याह। ...र्धूमत्वमपीति। अथ यद्वास्तवं तस्यैवावस्तुनि संसर्गो विरु-

दीधितिटिप्पणी।

असत्त्वे, साध्य इत्यनुषज्यते। अन्यत्रावस्तुत्वादित्यत्रापि उभ... इत्यस्यानुषङ्गः। तत्र च उभयोरित्यस्य व्याख्यामाह। पक्षहे... ...रित्यादि। यादृशम् यद्रूपावच्छिन्नम्। ननु तत्र काल्पनिकनिर्धू... न कल्पनीयम्, किन्तु वास्तवं निर्धूमत्वमेव कल्पनीयम्, अत ...। वास्तवं त्विति। काल्पनिकेति। भवता काल्पनिकाद्विपक्षात् ...ल्पनिकी व्यावृत्तिः वास्तवविपक्षाच्च वास्तवीति कृतनियमस्या॰

(१) एतत्—पुण॰ पु॰ पा॰। (२) रोम्न–कालि॰ मु॰ पु॰ पा॰।
(३) द्वस्तुभूत एवेति—कलि॰ मु॰ पु॰ पा॰।
(४) विरोधोऽविरोधश्चेत्यर्थः—कलि॰ मु॰ पु॰ पा॰।
(५) वयोर्या—कालि॰ मु॰ पु॰ पा॰। (६) कल्पेत—कालि॰ मु॰ पु॰ पा॰।
(७) यद्यप्युक्तरीत्या निर्वह्नित्वस्य तत्र कल्पनाया असम्भवेनासतो न विपक्षत्वम्, तथाप्य-केवलान्वयिमात्रोपलक्षणमिति ध्येयम्।—गुणानन्दः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिः ।

ध्यते, न तु तादृशस्यावास्तवस्यापि, हेतुश्च वास्तवे स्तव(१) एव धूमः, न चास्य काल्पनिकमपि विपक्ष विरोधादिति चेत्, वस्त्ववस्तुनोः संसर्गो विरुध्यते ना रित्यत्र न किञ्चिदपि(२) प्रमाणम्, कल्पनामात्रं तु(३) नापि सुलभम्, वस्तुनो(४) धूमस्य वस्तुनि जलह्रदादौ दुर्वारम्, वास्तवमेव च पक्षसत्त्वादिकमनुमानोपयोगि, अन्यथा(५)ऽतिप्रसङ्गात्, न तु(६) क्वचि(७)त्किञ्चिद्वास्तवं

दीधितिटिप्पणी ।

रक्षणादिति भावः । इदं त्वत्र चिन्त्यम् । यथा काल्पनिके न निकं निर्धूमत्वं वर्तते तथा वन्ह्यभावोऽपि न वर्तते, तुल्य तथा च तस्य काल्पनिकविपक्षत्वमपि नास्तीति कुतो व्यावृत्त्याऽग्निगमकत्वाभावरूपं दूषणमिति । तादृशस्य तद्रू न्नस्य । अवास्तवस्यापीति । येन निर्धूमत्वमित्यादिदोषः भावः । वन्हौ, साध्य इति शेषः । विरोधात् सदसादित्यादि तन्मतसिद्धान्तदूषणेन समाधत्ते । वस्त्ववस्तुनोरिति । नापीति । वस्त्ववस्तुनोरेव दोषः, न तु वस्तुनोरपीत्यर्थः । धूमस्येति । वस्तुनोः संसर्गे भवतां किमपि बाधकं नास्ति त्यर्थः। वास्तवमेव चेत्येवकारव्यावर्त्यमाह । न त्विति । व्यति

---

(१) वा—कलि० मु० पु० पा० ।

(२) न किञ्चिदिति । अवस्तुनि प्रमाणाप्रसरादिति भावः । वैपरीत्येन, वस्त्व विरोधेन ।—गुणानन्दः ।

(३) कल्पनामात्रस्य—कलि० मु० पु० पा० ।

(४) ननु वस्तुविषयकप्रमाणावस्तुविषयकवासनाभ्यां परस्परसहकारेण विरोध तत्राह । वस्तुन इति ।—गुणानन्दः ।

(५) अन्यथा, अवास्तवस्य तस्य तस्यानुमानोपयोगित्वे । अतिप्रसङ्गात्, शब्दे गुणत्वादिनाऽनुमानप्रसङ्गात् ।—गुणानन्दः ।

(६) ननु—कलि० मु० पु० पा० ।

(७) क्वचित्, वस्तुनो हेतुत्वे । किञ्चित्, पक्षसत्त्वं सपक्षसत्त्वं च, विप काल्पनिकमपीति भावः । क्वचित्, अवस्तुन एव यत्र पक्षत्वादिकम् । अवास्तवमपि, च तत्र वास्तवमिति भावः । ननु पक्षहेत्वादेरवस्तुवस्तुत्वादिकमेव नियामकं वाच्यम् कल्पनागौरवेति ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रोध एव । तस्माद् यथा काल्पनिकी विपत्तिर्न दोषा-
तथा काल्पनिकी सम्पत्तिरपि न गुणायेति व्यति-
नाक्रमभङ्गः ॥

दीधितिः ।

वास्तवमपि, नियामकाभावात्, कल्पनागौरवप्रसङ्गाच्च(१)न्य-
सन्धायोपसंहरति । तस्मादिति । व्यतिरेकः क्रमादिविरहेण
रस्य सत्त्वव्यतिरेकसाधनम्, क्षणिकत्वसाधनस्य च सत्त्वस्य
भ्युङ्गे व्यतिरेकः, तयोर्भङ्गः ॥०॥

दीधितिटिप्पणी ।

द्विवचनान्तसमासेन न्यूनत्वं परिहरति । व्यतिरेक इति ॥०॥

कल्पलता ।

परिहरति । प्रलपितमेतदिति । प्रलापः अनर्थकं
वः, तथा च त्वदभिधानमर्थशून्यमित्यर्थः । तदेव
र्शयति । न हीति । क्षणिकत्वसत्त्वयोरलीके व्यति-
सिद्धिः काल्पनिकी (तव) सम्पत् । सद्धेतोर-
सद्धेतुत्वापत्तिर्विपत् । विपदमेव दर्शयति । तथा
ति । ननु वस्तुनो विपक्षाद् धूमस्य वस्तुनो व्यावृ-
रस्त्येवेति धूमो वह्निं कथं न गमयेदित्याह । वा-
व्यामिति(२) । सत्त्वक्षणिकत्वयोरपि त्व(३)दुप-
र्शिता व्यतिरेकसम्पत्तिरवास्तव्येवेत्याह । तर्हीति ।
नु कूर्मरोम्णि(४) वस्तुसतो धूमस्य वृत्तौ विरोधः,अक्ष-
णिकत्वस्य(५) क्रमयौगपद्यविरहस्य चासत एवासति

(१) ङ्गश्च—कलि० मु० पु० पा० । (२) वास्तव्यमिति—पुण० पु० पा० ।
(३) सत्त्वक्षणिकत्वयोस्त्व—पुण० पु० पा० ।
(४) रोम्नि—कलि० मु० पु० पा० । एवमग्रेपि ।
(५) विरोधः क्षणिकत्वस्य—कलि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

कूर्मरोम्णि वृत्तावविरोध इत्याह । विरोधेति । योरिति ।) धूमकूर्मरोम्णोः, एकत्र धूमानुमा वस्त्ववस्तुत्वात्, अन्यत्र त्वदु(१)पदर्शिते व्या अवस्तुत्वात्, इति विरोधाविरोधावि(२)त्यर्थः त्किमिति । अवस्तु(भूतस्यैव)धूमस्या(३)वस्तुनि रग्निके गतत्वेन व्यभिचारस्य मयोक्तत्वात् क्व इत्यर्थः । क्वचिदिति । हेतुत्वेनोपात्तो धूमो व एव(४), स च नावस्तुनीति न(५) व्यभि इत्यर्थः । तर्हि निर्धूमत्वमपि कूर्मरोम्णि कथं ह्रदादौ तस्य वस्तुत्वात्, तथा च निरग्निकेऽली धूमवत्त्वं नापि निर्धूमत्वमिति महान्विरोध इ निर्धूमत्वमपीति(६) । व्यतिरेकभङ्ग इति । व्या व्याप्तिग्रहभङ्ग इत्यर्थः, तथा च त्वन्मते नान्व तिरेक(७)ग्रहोपि सत्त्वक्षणिकत्वयोरिति भावः ।

दीधितिः ।

प्रतियोग्युत्तरभाविनो हि कारणस्यापेक्षणीयत्वे प्रतियोगिनि तद्विलम्बाद्विलम्बो नाशस्य स्यात्, निर तस्मिन् भावस्योत्पत्त्यनन्तरमेव विनाशः, स एव च क्षण यदि चैवमुत्पत्तिमतां क्षणिकत्वे सिद्धेऽपि नित्यत्वेन पै

दीधितिटिप्पणी ।

मूले नित्ये क्षणभङ्गसाधकं न प्रतीयते, एवमितरत्रापि माशङ्क्याभासमाह । प्रतियोगीत्यादि । तस्मिन् इतरकार

(१) अन्यत्र तु सदु—पुण० पु० पा० । (२) विरोधाविरोधादि—कालि० मु०
(३) धूमस्यैवा—पुण० पु० पा० । (४) वस्तुसत एव—पाठः ।
(५) नावस्तुनीति स—पा० २ पु० । (६) निर्धूमत्व इति—पा० २ पु० ।
(७) नान्वयव्याप्ति—पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्तु तर्हि ध्रुवभावित्वेन विनाशस्याहेतुकत्वसि-
(१) क्षणभङ्गः। न। विकल्पानुपपत्तेः। तद्धि तादात्म्यं

दीधितिः।

नां परमाणूनां तत्र सिद्धमिति विभाव्यते, तदाऽनि-
(२) सिद्धव्याप्तिकेन सत्त्वेन तेषां विनाशित्वं क्षणिकत्वं
साधयिष्यत इत्याशयवानाशङ्कते। अस्तु तर्हीति। अहेतु-
च तदुत्पत्त्युत्तरभाविहेत्वनपेक्षत्वम्। अत्र च यो यस्य
भावी स तदुत्पत्त्युत्तरभाविहेत्वनपेक्षः, यथा पूर्वस्य बीजक्ष-
णोत्तरः, यथा वा(३) कर्मणो विभागः, ध्रुवभावी च प्रति-
नो विनाश इति वस्तुतस्तेषामाभिमतः प्रयोगः(४)। उद-
पि परकीयसिद्धान्तभेदानुसारेण विकल्प्य दूषयति। तद्धी-
दि। तत् ध्रुवभावित्वम्। तादात्म्यम् प्रतियोगि(५)तादा-
म्, न च(६) तदात्मनस्तदुत्तरभाविसापेक्षत्वसम्भव इति

दीधितिटिप्पणी।

यत्वे। सत्त्वेन विनाशित्वं प्रसाध्य तेन ध्रुवभावितया क्षणभङ्ग-
नमपेक्ष्य सम्मुख एव क्षणभङ्गसाधनमुचितमित्याह। क्षणि-
वेति। तन्मतेऽपि विनाशस्य प्रतियोगिजन्यतयाऽहेतुक-
ङ्गतेराह। अहेतुकत्वं चेति। अत्र च प्रयोग इति सम्ब-
। उत्तरः, बीजक्षणः। पक्षधर्मतां दर्शयति। ध्रुवभावी चेति।
मभिमत इति। तेषां ह्यवयवत्वादिति भावः। उदक्षरमपीति विक-
इत्यन्वयि। तादात्म्यं तैरुक्तं किं वाभिमतं क्रियते इत्याह। न

(१) ध्रुवभावित्वाद्विनाशस्याहेतुकत्वेन—पाठः। ध्रुवभावित्वेन विनाशस्याहेतुकत्वे सिद्धे—मु० पु० पा०।
(२) तदा नित्येषु— कलि० मु० पु० पा०। तदा जन्येषु—पुण० पु० पा०।
(३) न्यायनये दृष्टान्तमाह। यथा वेति।—गुणानन्दः।
(४) माभिमतप्रयोगः—पा० २ पु०।
(५) केन तादात्म्यमित्यपेक्षायामाह। प्रतियोगीति।—गुणानन्दः।
(६) व्याप्तिं द्रढयति। न चेति।—गुणानन्दः।

CC-0. In Public Domain. Gurukul Kangri Collection

Digitized by Arya Samaj Foundation Chennai and eGangotri

वा, निरुपाख्यत्वं वा, तत्कार्यत्वं वा, व्यापक
वा, अभावत्वमेव वेति(२)।

दीधितिः।

भावः। निरुपाख्यत्वम् निःस्वभावत्वम्, अली
यावत्। अलीकस्य च (न) कारणापेक्षित्वम्(३),
मेव च तदलीकं प्रतिनियतदेशकालमिति नातिप्रसङ्ग इति

दीधितिटिप्पणी।

चेति। तेन कथमहेतुकमङ्गीक्रियत इत्याह। अलीकस्य
नन्वलीकस्य काल्पनिकतया सार्वत्रिकतया कथमत्र देशे
एव भवतीत्यादिप्रतिनियतकालाद्यपेक्षेत्यत आह। विलक्षण

कल्पलता।

ध्रुवभावित्वे तु वक्ष्याम(४) इति यदुक्तं, त
अस्त्विति। ध्रुवम् अवश्यं भावोऽ(स्या)स्तीति ध्रु
विनाशः। एतावता सत्त्वक्षणिकत्वयोर्व्याप्ति
तीति हृदयम्। (विकल्पेति।) विकल्पस्य प्रकृ
रौपयिकसंशयस्य, अनुपपत्तेरित्यर्थः। यद्वा वि
नां विविधकल्पानां त्वदभिमतानाम्, अनुपपत्तो
यद्वा विकल्पे क्रियमाणे त्वदभिमतपक्षानुप
त्यर्थः। तद्धीति। विनाशस्य ध्रुवभावित्व
त्यर्थः। यद्यपि एते विकल्पा ध्रुवभावित्वस्य न
तुमर्हन्ति, तदर्थासंस्पर्शात्, तथापि तात्पर्यात्
कथञ्चिद्विनाशस्याहेतुकत्वप्रयोजका द्रष्टव्याः।
नां विनाशोऽहेतुकः, ध्रुवभावित्वात्, यद्यस्य(६)

(१) तत्कार्यत्वं वा, तद्व्यापकत्वं वा—कलि० मु० पु० पा०।
(२) मेव वा—पुण० पु० पा०। (३) कारणानपेक्षित्वं—पुण० पु० पा०
(४) वक्ष्यत—कलि० मु० पु० पा०। (५) भावित्वाना—कलि० मु० पु०
(६) यद्यद्—कलि० मु० पु० पा०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

वि तत्तद(१)हेतुकम् । तादात्म्यं वेति । वि-
तस्य प्रतियोगितादात्म्यमित्यर्थः । निरुपाख्यत्व-
ते(२) । अलीकत्वमित्यर्थः । तत्कार्यत्वमिति ।
योगिकार्य(त्व)मित्यर्थः । व्यापकत्वं वे(३)ति ।
योगिव्यापकत्वं वे(४)त्यर्थः ॥

न पूर्वः(५), निषेध्यनिषेधयोरेकत्वानुपपत्तेः ।
पत्तौ वा विश्वस्य वैश्वरूप्यानुपपत्तेः ।

दीधितिः ।

निषेध्येति(६) । मिथो(७)विरुद्धस्वभावत्वादिति भावः ।
तद्रूप्येति । निषेध्यनिषेधयोरैक्ये क्वचिदपि(८) विरोधासि-
विरुद्धधर्मसंसर्गोच्छेदे भेदा(९)सिद्धावद्वैतमेव स्यात्, स्याच्च
देवाभावशेषं(१०), स्वदेशकालयोरपि तस्यासत्त्वादित्यर्थः ॥

दीधितिटिप्पणी ।

निषेध्यम् प्रतियोगि । निषेधः अभावः । यद्वा निषेध्यम् नाश्यम् ।
धः नाशः । क्वचिदपीत्यादि । प्रतियोग्यभावयोरैक्ये घटत्वाभा-
घटत्वस्य घटत्वादिसमानाधिकरणतया घटत्वपटत्वादीनामपि
परासामानाधिकरण्यरूपविरोधासिद्ध्या विरुद्धधर्मवत्त्वाभावेन
टादीनामपि भेदो न सिद्ध्येत्, इत्थं च जगत एवैक्यं स्यादि-
। इत्थं च इतरदपि स्यादित्याह । स्याच्चेति । अभावशेषम्
वानतिरिक्तम् । न च भावशेषत्वमेव कथं नापादितमिति वा-
। तस्य मूलेनापाद्यत्वान्नोक्तमिति । यद्यप्येतदद्वैतापादनेनैव

(१) तदन्या—पुण० पु० पा० । (२) निरुपाख्यमिति पाठः ।
(३) व्यापकत्वं चे—कलि० मु० पु० पा० । (४) व्यापकमि—कलि० मु० पु० पा० ।
(५) पूर्वकल्पः—पुण० पु० पा० । (६) निषेधेति—पुण० पु० पा० ।
(७) मिथ इति । ध्वंसे च कालिको विरोधोऽस्माकं तेषां च दैशिकोऽपि ।—गुणानन्दः ।
(८) क्वचिदपीति । यत्र यस्य धर्मस्याभावो वर्तते तत्र तस्यापि सत्त्वादिति भावः ।—
दः । (९) भेद—कलि० मु० पु० पा० ।
(१०) अभावशेषमिति भावशेषस्याप्युपलक्षणम्, तुल्ययुक्तेः ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिटिप्पणी ।

प्राप्तम् , तथापि स्पष्टत्वार्थमुक्तम् । केचित्तु जगद्धटाभावमयं
त्यर्थ इत्याहुः । हेतुमाह । स्वदेशेति । स्वदेशकालयोरपि स्वा
भावस्य सत्त्वादित्यर्थः ॥

कल्पलता ।

निषेध्येति । न हि घट एव घटाभाव(१
कस्यचिदनुभवो व्यवहारो वेति भावः ।
परीक्षकाणां(३) ताव(त्त)दुभयमस्तीत्यत आह
पत्तौ वेति । वैश्वरूप्यम्(४) वैचित्र्यम् , तत्
त्तिः, सर्वेषां घटपटादीनामभावैकस्वभावत्वादि
यद्वा विरोधिनोरपि तादात्म्ये गवाश्वादीनाम(५)
तादात्म्यापत्तेरित्यर्थः ॥

ननु कालान्तरेऽर्थक्रियां प्रत्यशक्तिरेवास्य
ता, सा च कालान्तरे समर्थेतरस्वभावत्वमेवो

दीधितिः ।

ननु कालान्तरे समर्थेतरस्वभावो भाव एव विना
नोक्तदोष इत्याशङ्कते । नन्विति । सा चेति । नास्तितं
कालान्तरवर्त्ती भावो हि सामर्थ्यविरहेण समर्थात्प्राचो भि
द्यमानो लाघवात् तस्य विनाशोऽभ्युपेयते, अथाभिन्न

दीधितिटिप्पणी ।

कालान्तरे कार्यकालत्वाभावक्षणे । नास्तितता नाशः ।
त्वादिमूलतोऽभेद एव प्रतीयते, अभेदपक्षे च नन्वयमेव
इति न लगतीत्यतो विकल्प्य सङ्गमयति । कालान्तरेति । प्राे
वात् प्राचीनभावात् । अथाभिन्न एव, विनाशोऽभ्युपेयत इ

(१) घटविनाश—कलि० मु० पु० पा० । (२) भावः ।—पा० २ पु० ।
(३) परीक्षितानां—कलि० मु० पु० पा० । (४) वैश्वरूपं—पुण० पु० पा०
(५) गवाश्वादेरपि— पुण० पु० पा० । गवादेरपि—पुण० पु० पा० ।
(६) स्वभावत्वमिति—पा० २ पु० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

, नन्वयमेव क्षणभङ्गः, तथा चासिद्धमसिद्धेन सा-
तः कस्ते प्रतिमल्लः(१)।

दीधितिः।

, नन्वित्यादि। सामर्थ्यविरहो हि भेदं साधयन् क्षणभङ्ग
स्यति, न चासावद्यापि सिद्ध इत्यर्थः। विनाशस्य प्रति-
तेतादात्म्याभ्युपगमविरोधश्चेत्यपि(२) द्रष्टव्यम्॥

दीधितिटिप्पणी।

। ननु समर्थेतरस्वभावत्वं सामर्थ्यविरह एव, नन्वयमित्या-
कथमस्य क्षणभङ्गाभेद आपादितः, वरमेतेनास्य क्षणभङ्गावि-
तत्वं भवत्वित्यतस्तत्पर्यवसानरूपार्थमाह। सामर्थ्यविरह इ-
। भेदं साधयन्, प्राचो भावात्॥

कल्पलता।

प्रकारान्तरेण विनाशस्य प्रतियोगितादात्म्यं श-
। नन्विति। स्वोत्पत्त्यव्यवहितोत्तरक्षणे भावो-
क्रियां प्रत्यसमर्थ इत्यशक्तिरेव तदातनी(३) ना-
ता, तथा च समर्थेतरस्वभावो भाव एव नास्ति-
सैव च नाश इत्यर्थः। प्रथमक्षणे सामर्थ्यमग्रि-
णे(चा)ऽसामर्थ्यमिति विरुद्धधर्माध्यासेन भेद
(तव) विवक्षितः, तथा च क्षणभङ्ग एवानया(४)
नभङ्गा त्वयोच्यते, स च पूर्वोक्तसामर्थ्यासामर्थ्य-
ोजकप्रसङ्गतद्विपर्ययाधीनः(५), तौ च दूषिताववे-
ाह। नन्वयमेवेति। तथा चेति। तथा च प्रकारा-
रेण(६) समर्थेतरस्वभावत्वमसिद्ध(मसिद्धेन)क्षण-
ङ्गेन साधयत इत्यर्थः॥

(१) प्रतिमल्लः—पाठः। प्रतिनन्दः—कलि० मु० पु० पा०। (२) श्चेति—पुण० पु० पा०।
तदानीं—पुण० पु० पा०। (४) क्षणभङ्गप्रधानया—पुण० पु० पा०।
धीनश्च—कलि० मु० पु० पा०। (६) तथा चेति। कालान्तरे—पुण० पु० पा०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपि च देशान्तरकालान्तरानुषङ्गिण्यस्य(१)। अशक्ते
स्तिता यद्ययमेव, नूनमनक्षरमिदमुक्तं, यदयमेव म्, अथ
न्तरकालान्तरानुषङ्गीति। यदि वा स्वदेशकाम्, (किं
कालान्तरदेशान्तरयोरपि नास्तितानुषङ्गेऽस्तिताक्तिरसत्त्वम्

दीधितिः ।

द्वितीये, अपि चेति। देशस्यापि(२) क्षणिकत्वात्प्रति शक्ति
न्तरेत्युक्तम्। अभावसामान्या(३)भिप्रायेणेत्यन्ये। चल(४),
न(४)मभिप्रेत्येत्यपरे। पूर्व(५)मशक्तिरशक्तस्वभावरूपा। काल

दीधितिटिप्पणी ।

देशस्यापीति। ध्वंसस्य प्रतियोगिदेश एव वृत्तेः प्रति
णोत्तरं तद्भूतलमेव देशान्तरपदेनोक्तम्, न तु प्रतियोग्यत्यति। पूर्वमि
वाधिकरणं देश इति। यद्यप्येतद्देशस्यापि प्रतियोग्यनधि तथा चा
याऽत्रापि कथं ध्वंसस्य वृत्तित्वमिति वाच्यम्, तथापि तत्काल इत्य
थानुपपत्त्या प्रतियोग्यनधिकरणसमुद्भूताधिकरणजातीयपरकालेपि तद
मेव ध्वंसवृत्तित्वाङ्गीकारात्। अभावसामान्येति। नास्तितापं
भावसामान्यमेवोक्तम्, तथा चात्यन्ताभावस्यैव देशान्तरवृ
स्तीति भावः। चलेति। यत्र परमाणुश्चलन्नेव एकभूतलता
रणान्तरे द्वितीयक्षणे पतति, तत्र द्वितीयाधिकरणरूपदेशान्त
तीयक्षणवर्त्तितत्परमाणुरूपध्वंस एवास्तीत्यर्थः, तथा चैतन्न
काधिकरणमात्रे यद्वर्तते तदत्र नोक्तमिति भावः। पौनरुक्त्याभ

(१) नुषङ्गिन्यस्य —पा० २ पु०।

(२) ध्वंसस्य प्रतियोगिसमानदेशत्वे कथमेतदित्यत आह। देशस्यापीति। यद्य
क्षणतया कालान्तरमेव, तथापि दैशिककालिकसम्बन्धभेदाद्विवक्षाभेदोऽवसेयः।—गुणानन्द

(३) अभावसामान्येति। तथा चात्यन्ताभावमादाय देशान्तरवृत्तित्वसमन्वय इ
उक्तप्रणाल्या यथाश्रुतेनैवोपपत्तिरत्रारुचिबीजम्।—गुणानन्दः।

(४) चलसन्तानेति। अत्र चलेति पूर्वसम्बद्धदेशेऽभावोपपादकम्। सन्तानेति प्र
भाय। अत्र च प्रतियोगिसमानदेशत्वेपि यत्रोत्तरता प्रतीयते तदपेक्षया देशान्तरत्वोपपत्ति
प्राक् प्रतीतं तदपेक्षया देशान्तरत्वेन ध्वंसोपि बोध्यः।—गुणानन्दः।

(५) पौनरुक्त्यमाशङ्क्याह। पूर्वमिति। अशक्तस्वभावः, शक्तभेदः।—गुणानन्दः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

। अशक्ते(१) कथमस्तु, शक्तेः सत्तालक्षणत्वादिति
…, अथ कालान्तरकार्यं प्रति स्वकालेऽशक्तिरस-
…म्, (किं वा) स्व(२)कार्यमपि प्रति कालान्तरे-
…शक्तिरसत्त्वम् ।

दीधितिः ।

…प्रति शक्तिविरहरूपां(३) तामाशङ्कते, अशक्ते(४) कथम-
…ल(५), कालान्तरेऽस्तित्वमिति (शेषः)(६) । कालान्त-
… । कालान्तरीण(७)कार्याशक्तेः स्वकालेपि(८) भावात्
…काल इत्युक्तम्, न तु विकल्पान्तर्गतमिति(९) मन्तव्यम् ॥

दीधितिटिप्पणी ।

…इत्यादावित्यर्थः(१०) । अस्तित्वत्या-
…ति । पूर्वमिति। ननु कालान्तर इत्यस्यानुषङ्गो बोध्य इत्यर्थः ।
… तथा चास्तित्वत्यत्रास्तित्वप्रसङ्ग कालान्तरे(ती)ति । वस्तुतः
…काल इत्यस्य वैयर्थ्यमाशङ्क्याह । किमपि प्रयोजनमिति भावः ॥
…कालेपि तदस्तीत्युक्तं, न तु तस्य

कल्पलता ।

यदि च घटनास्तिता घटात्मिका देशान्तरकाला-
…रयोरनुवर्त्तते, तदा तद्रूपतया घटस्यैवानुवृत्तिः, अथ
… नानुवर्त्तते, तदा स्वरूपत एव घटानुवृत्तिरिति

(१) अशक्तेः-पुण० पु० पा० । अयं पाठो गुणानन्दकल्पलताकृत्सम्मतः ।
(२) स्वा—कलि० मु० पु० पा० । (३) रूप—कलि० मु० पु० पा० ।
(४) अशक्तेः—कलि० मु० पु० पा० । अयं पाठो गुणानन्दसम्मतः ।
(५) कथमस्त्विति—कलि० मु० पु० पा० ।
(६) अधिकरणाकाङ्क्षां पूरयति । कालान्तर इति । धर्मिनिवेशस्य वैयर्थ्यमाख्यातपक्ष-स्य च तथात्वमाशङ्क्याह । अस्तित्वमिति ।—गुणानन्दः ।
(७) कालान्तरीय—कलि० मु० पु० पा० ।
(८) स्वकालेऽपीति । एतच्च स्वकालेऽसत्त्वापादनरूपदोषायोपयोक्ष्यत इति ध्येयम् ।—गुणानन्दः ।
(९) न्तर्गतं—कलि० मु० पु० पा० ।
(१०) २६४ पृष्ठे १३ पङ्क्तौ मूलमिदं वर्तते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

घटादेः(१) क्षणिकतां साधयितुमुद्यतस्य नित्यत
सुत्वं च पर्यवसितमित्युभयतःपाशा रज्जुरि
अपि चेति । अयमेव भाव एव । ननु देशान्त
लान्तरे वा भावस्याशक्तिं ब्रूमः, तथा च तदुभय
सत्त्वमापद्यतामिति(२) शङ्कते । अशक्तेरिति ॥

आद्ये स्वकालेऽप्यसत्त्वप्रसङ्गः, तदानीमपि
स्य) तादूप्यात् । कालान्तरकार्यं प्रत्येवमेतदि
चेत्, किमयं मन्त्रपाठः । न हि यो यत्राशक्तः
दपेक्षया नास्तीति व्यवह्रियते । न हि रासभा
धूमो जगति नास्ति, तत् कस्य हेतोः, न ह्य
स्वरूपं निवर्तत इति ।

दीधितिः ।

× × ×

दीधितिटिप्पणी ।

× × ×

कल्पलता ।

कालान्तर(४)कार्यं प्रत्यशक्तिरसत्त्वमिति चे
तदा(५) बीजादेः स्वकालेपि कालान्तरकार्यं प्र
क्तिरेव, न हि स्वकाले बीजादि *(६)कालान्तरका

---

(१) कालान्तरकार्यं प्रत्यशक्तिरेव, न हि बीजादि कालान्तरकार्याणि करोतीति स्व
जादेरसत्त्वप्रसङ्ग इति प्रथमविकल्पार्थः ॥ स्वकालेऽपि —कालि० मु० पु० पा० ।

(२) मापद्यत इति—पा० २ पु० । (३) त्येवमेवे—पुण० पु० पा०

(४) कालान्तरे—पुण० पु० पा० । (५) चेद्ब्रूषे, यदा—पुण० पु० पा०

(६) एतत्पुष्पिकामारभ्याग्रिमपुष्पिकाचिन्हपर्यन्तो ग्रन्थः २ पु० नास्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

कल्पलता ।

तीति स्वकालेऽपि बीजादेरसत्त्वप्रसङ्ग इति प्रथम-
कल्पार्थः(१) । तदानीमिति । तदानीमपि स्वकाले-
। तस्य बीजादेः । तादूप्यात् कार्यं प्रत्यशक्तत्वा-
त्यर्थः(२) । (एवमेतदिति ।) एतत् बीजादि । एवं
कालेपि* कालान्तरकार्यं प्रत्यसदेवेत्यर्थः । किमयमि-
। सदपि किञ्चिदपेक्षयाऽसदिति(३) विरोधपरि-
रो मन्त्रपाठं(४) विना नोपपद्यत इति भावः ।
वहारविरोधमाह । न हीति । व्यवहारविरोधमेव
पपत्तिकमाह । न हि रामभेति ॥

द्वितीये तु यदि कालान्तराधाराऽशक्तिः, कथं

दीधितिः ।

स्वकार्यं प्रति कालान्तरनिरूपिता (तस्या)ऽशक्तिः कालान्त-
निष्ठा(५) तन्निष्ठा(६) वा । आद्यं दूषयति । यदीति । कथ-
ति । तस्य त्वया(७) क्षणिकत्वाङ्गीकारादिति भावः ।

दीधितिटिप्पणी ।

कथमिति मूलम्, तेन तस्य तदात्मकत्वाङ्गीकारादित्यर्थः ।
य त्वयेति । इदानीं वृत्तेः क्षणिकस्य कालान्तरवृत्तिरूपत्वा-

(१) स्वकालेपि तस्य बीजादेस्तादूप्यात् कालान्तरकार्यं प्रत्यशक्तत्वादित्यर्थः—कलि० पु० पा० ।

(२) तदानीमपि स्वकालेपि—कलि० मु० पु० पा० ।

(३) दपेक्षया त्वसदिति –पुण० पु० पा० ।

(४) परिहारो मन्त्रपारं—पुण० पु० पा० ।

(५) कालान्तरस्य निरूपकत्वमधिकरणतयाऽवच्छेदकतया वेति भेदेन विकल्पयति । कालान्तरनिष्ठेत्यादि ।—गुणानन्दः ।

(६) पूर्वोपक्रान्तं यत्स्वं तन्निष्ठेत्यर्थः ।

(७) ननु कालान्तरवृत्तिर्यः शक्त्यभावः स कालान्तरवृत्तिर्भावभेद एव कल्प्यते, लाघवात्, तथा च कालान्तरवृत्तित्वमेव तस्य नोपेयत इति भावः ।—गुणानन्दः ।

Ordering note: footnote (7) continues "च स एव भावः, तथा च तथापि तदात्मकत्वं स्यात्, तत्राह । तस्य त्वयेति । तथा च काला-" before "वृत्तित्वमेव तस्य नोपेयत इति भावः ।—गुणानन्दः ।"

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदात्मिका । तदाधारा चेत्, तदैवासत्त्वप्रसङ्गः,
न्तरे तु विपर्ययः । तस्मात्

विधिरात्माऽस्य भावस्य(१) निषेधस्तु ततः प
सोऽपि चात्मेति कः प्रेक्षः शृण्वन्नपि न लज्जे

दीधितिः ।

द्वितीये त्वाह । तदे(२)त्यादि । तदात्मिकाया(३)
स्तत्काल एव सत्त्वादिति भावः । अभेदे कथमाधारा
इत्यपि द्रष्टव्यम् । तदाधारेत्यस्य तत्कालाधारे(४)त्य
(तु) केचित् । विपर्ययः असत्त्वव्यतिरेकप्रसङ्गः । उप
तस्मादिति । आत्मा स्वरूपम् । अस्य(५) निषेध इत्य

दीधितिटिप्पणी ।

भावादित्यर्थः । तदात्मिकाया इति । अशक्तेरसत्त्वरूपतया
लेऽसत्त्वापादनं बोध्यम् । अन्तिमदोषोद्धारिणां मतमाह ।
त्यस्येति । विपर्यय इति । असत्त्वस्य प्रतियोग्याधारकतया क
प्रतियोग्यसत्त्वेनासत्त्वस्याप्यभावप्रसङ्ग इत्यर्थः । इत्यन्वय
तथा च भावस्यात्मा विधिः, अस्य निषेधस्ततः पर इत्यन्वय

कल्पलता ।

स्वकार्यमपि प्रति(६) कालान्तरे(ऽपि) अ
रसत्त्वमिति द्वितीयं पक्षं दूषयति । यदीति । कथ
त्मिका कथं प्रतियोग्यात्मिका, प्रतियोगिनः प्रथ

(१) विधिरात्माऽभावस्य—पुण० पु० पा० । (२) तदैवे—पुण० पु० पा०
(३) एवकारार्थानुपपत्तिमाशङ्क्याह । तदात्मिकाया इति । तत्काल एव, ध्व
मतभावकाल एव ।—गुणानन्दः ।
(४) तत्कालाधारेति । तथा च कालान्तरनिष्ठा तत्कालनिष्ठा वेति विकल्पोऽवशे
स्वनिष्ठत्वविकल्पानिरसने न्यूनत्वमरुचिबीजम् ।—गुणानन्दः ।
(५) केवल धिकरणस्य अभावतामुपगच्छतां को विरोध इत्यत आह । अस्य नि
तस्य ध्वंस इत्यर्थः ।—गुणानन्दः ।
(६) स्वकार्यमपि—पा० २ पु० । (७) प्रतियोगिनः—कालि० मु० पु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

मात्रवृत्तितया द्वितीय(१)क्षणेऽसत्त्वादित्य-
। तदाधारा चेदिति । प्रतियोगिकालाधारे-
ः। कालान्तर इति । स्वकालाधारैव चे(२)दशा-
सत्त्वं, तदा स्वकालातिरिक्ते काले भावस्य सत्त्व-
ङ्ग इति स्थैर्यमेवावर्त्तेत इति भावः। प्रथमविक-
ङ्ग(३)मुपसंहरति। तस्मादिति। (स्व)भावाभा-
विधायक(निषेधक)प्रमाणगोचरयोस्तादात्म्यं स-
ऽनुपपन्नमित्यर्थः। प्रकृष्टा ईक्षा प्रेक्षा, तया व्य-
रतीति प्रेक्षः ॥

अस्तु तर्हि भावस्वरूपातिरिक्ता निवृत्तिर्नास्तीति
त्यस्य(४) सोपाख्येति शेषः। नन्वयमपि क्षणभ-

दीधितिः ।

द्वितीयं(५) पक्षं तदीयग्रन्थाविरुद्धं व्युत्पादयन्नाशङ्कते ।
तर्हीति। शेषः अध्याहरणीयो भागः, तथा च भावस्व-
तिरिक्ता सोपाख्या निवृत्तिर्नास्तीति पर्यवसितवाक्यस्य निरु-
या निवृत्तिरिति तात्पर्यम्। (एतद्दूषयति। नन्वयमपीति।

दीधितिटिप्पणी ।

द्वितीयं पक्षम् निरुपाख्यत्वरूपम्। तदीयग्रन्थाविरुद्धमिति।
स्वरूपातिरिक्ता निवृत्तिर्नास्तीति तदीयग्रन्थपङ्क्तिः, निवृत्तेरलीक-
कारे एतद्वाक्यं विरुध्यते, भावातिरिक्तस्यैवालीकत्वात्, अत
न्थं सोपाख्यपदाध्याहारेणाविरुद्धं सम्पादयन्निदमुच्यत(६) इत्य-
तदीयग्रन्थत एव इदं कथं लब्धं, येन तन्मतसिद्धमिति वाच्य-
माह। इति तात्पर्यमिति। न क्वापीत्युक्ते कथं तस्य सार्वत्रिक-

---

(१) द्वितीये—कलि० मु० पु० पा०। (२) स्वकालाकारैरन्य—कलि० मु० पु० पा०।
(३) प्रथमविकल्पप्रसङ्ग—कलि० मु० पु० पा०। प्रथमविकल्पस्तु नाशस्य प्रतियोगितादा-
बोध्यः। (४) नास्तीत्यस्य—पाठः। (५) द्वितीयम्, निरुपाख्यत्वरूपम्।-गुणानन्दः।
(६) सम्पादयित्वेदमुच्यत इति पाठो युक्तः प्रतिभाति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ङ्गस्योद्गारः(१), स च(२) कफोणिगुडायितो
भवतु वा निवृत्तिरसमर्था, तथाप्यहेतुकत्वं तस्या
मायातम् । तुच्छस्य कीदृशं जन्मेति चेत्,
कालदेशनियमः । सोऽपि तस्य कीदृश इति चेत्
वं(३) तर्हि न घट(४)निवृत्तिः क्वापि कदापि
सर्वत्रैव सदैव वेति(६) स्यात्(७) ।

दीधितिः ।

निरुपाख्या चेन्निवृत्तिरहेतुका तदोत्पन्नमात्रस्यैव
सा भवेदिति क्षणभङ्गसिद्धिरिति तत्राभिप्रायः ।) स.
निरुपाख्यत्वमेवासिद्धमिति भावः । (कफोणिः कूर्परः ।
ऽपीति । तस्य तुच्छस्य, घटनिवृत्तेर्देशकालसम्बन्ध
नास्तीत्यर्थः । घटनिवृत्तेर्देश(८)कालसम्बन्धनियमनिषे
किं विशेषणस्य सम्बन्धांशस्य(९) निषेधः, किं वा वि
नियमांशस्य । आद्यं विवृणोति । न घटेत्यादि(१०) ।
त्वाह । सर्वत्रैवेति । घटनिवृत्तिरित्यनुषज्यते ॥

दीधितिटिप्पणी ।

त्वम्, येन सर्वत्रैवेत्यादि सङ्गतं स्यादतो विकल्प्य सङ्गमय
टनिवृत्तेरिति । किं वेति निषेध इत्यन्वयि ॥

(१) स्योद्गारः—पाठः । (२) स तु—पा० २ पु० । (३) एवं च—
(४) घटादि—पुण० पु० पा० । (५) कदापि—कलि० मु० पु० पा० ।
(६) सर्वदैवेति वा—पा० २ पु० ।

(७) अस्तु तर्हीति । तदपि निवृत्तेर्नानादेशकालानुगमादलीकत्वमनलीकस्य
स्यात्, तदेव त्वसिद्धमित्याह । नन्वयमपीति । सिद्धमभ्युपेत्याप्रयोजकत्वमाह । भवत्विति
स्येति । निर्धर्मकस्याद्यकालसम्बन्धरूपधर्मासम्भव इत्यर्थः । यादृश इति । अलीकस्य
कालसम्बन्धवज्जन्माप्यस्त्वित्यर्थः । सोऽपीति । अलीकत्वादेव देशकालनियमोऽपि तु
स्तीत्यर्थः । निवृत्तेर्देशकालनियमस्य विशिष्टस्याभावो यदि देशकालसम्बन्धस्य विशेषण
तत्राह । न घटनिवृत्तिरिति । अथ तत्सम्बन्धसत्त्वेऽपि विशेष्यनियमाभावात्, तत्राह ।
भगीरथठक्कुरः । (८) घटनिवृत्तिदेश—पुण० पु० पा० ।
(९) सम्बन्धान्तस्य—पुण० पु० पा० । (१०) न घट इत्यादि—पा० २

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

निरुपाख्यत्वं वेति द्वितीयं विकल्पमुत्थाप्य नि·
करोति । अस्त्वति । भावस्वरूपातिरिक्ता(१) नि·
त्तेर्नास्तीति कीर्तिवाक्यं सोपाख्येति शेषं दत्त्वा
ाकरेण(२) व्याख्यातं, तेन निरुपाख्या(३) निवृत्ति·
त्यर्थः पर्यवस्यतीत्यभिप्रायः । एतद्दूषयति ।
वयमपीति । निरुपाख्या चेन्निवृत्तिरहेतुका तदोत्प-
ात्रस्यैव भावस्य सा भवेदिति क्षणभङ्गसिद्धिरिति
ाभिप्रायः, स च निवृत्तेः सोपाख्यत्वसाधनात्
ामेव निरस्त इति भावः। कफोणिः कूर्परः। तत्पर्य·
(४)गतस्य गुडस्य यथा लेहनमनुपपन्नं, (तथा) ब·
ा निरस्तस्य क्षणभङ्गस्य पुनरवष्टम्भो(५)ऽनुपपन्न
त्यर्थः। भवतु वेति। निवृत्तेरलीकत्वं ध्रुवभावि-
मू(६), तेन(७) तस्या अहेतुकत्वसाधनमनुपपन्नमिति
ाव: । तुच्छत्वादेवाहेतुकत्व(८)मिति शङ्कते । तुच्छ·
ति । यथा वस्तुनो जन्म देशकालादि(९)नियमगम्यं,
ा तुच्छस्यापीति परिहरति । यादृश इति । सोऽपि
यमः । तस्य तुच्छस्य । एवं तर्हीति । तुच्छाया नि-
तेरुत्पादाभावादि(१०)त्यर्थः, तथा च क्षणिक(त्व)सि·
र्धे विनाशस्याहेतुकत्वं ध्रुवभावित्वेनाभिमतं नित्य·
मेव भावस्य साधयेदिति शुद्धा बुद्धिरिति भावः ॥

(१) भावस्वरूपातिरिक्त—पा० २ पु० । (२) प्रज्ञाकारेण—पा० २ पु० ।
(३) निरुपाख्य—पा० २ पु० । (४) कफोणीति । कफोणिपर्यन्तं—पुण० पु० पा० ।
(५) पुनरारम्भो—कालि० मु० पु० पा० ।
(६) भवेदिति तवाभिप्रायः, स च निवृत्तेः सोपाख्यत्वसाधनात्—पा० २ पु० ।
(७) तेन च—पुण० पु० पा० । (८) वाहेतुक—पा० २ पु० ।
(९) जन्म कालादि—कालि० मु० पु० पा० । (१०) भाव इ—कालि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवतु(१) प्रथम एवेति चेत्, सोऽयं भाव
तास्वरूपप्रतिषेधो वा, भावप्रतिषेधेन निवृत्ति(

दीधितिः ।

प्रथमः घटनिवृत्तिदेशकालसम्बन्धनिषेधः । सोऽ
देशकालसम्बन्धस्य(३) निषेधः, किं वा घटनिवृत्तेः
निवृत्तेर्देशकालासम्बन्धित्वेनाविरोधित्वात् घटस्य सार्व
सदातनत्वप्रसङ्गात्(४)। द्वितीयोपि(५) निवृत्तेर्निषेधोऽयम्
घटस्य वेति विकल्प्य दूषयति । सोऽयमिति । भावेति
विषयस्य(६) गुणत्वेनाभिधानमितरफलकत्वसूचनाय
त्ति(७)स्व(८)रूपानिरुक्तिपर्यवसायी भावप्रतिषेधो वे
निवृत्तिस्व(९)रूपमत्यन्तासत्प्रतियोगिकत्वम् । भाव
कालयोः सम्बन्धः । तत्प्रतिषेधेन निवृत्तिस्व(१०)रूप

दीधितिटिप्पणी ।

विकल्पविषयस्येति । द्वितीयविकल्पे भावप्रतिषेधस्य वि
तस्य प्राधान्येन दर्शनमुचितम्, न गौणत्वसूचकतृतीयान्तत
लिखनं च इदं न मुख्यफलं, किं तु इतरदेवास्य फलमस्तीतिबो
र्थः । इतरफलमेवाह । निवृत्ति(स्व)रूपेति । तादृशपर्यवसानमे
नफलमित्यर्थः । तत्प्रतिषेधेनेति । तस्य देशकालसम्बन्धस्य

(१) अस्तु—पाठः । (२) भावस्वरूपनिषेधेन नास्तिता—पा० २ पु०
(३) सम्बन्ध-पा० २ पु० । (४) प्रसङ्ग इति-कलि० मु० पु० पा० ।
(५) द्वितीयमपि-कलि० मु० पु० पा० ।
(६) भावप्रतिषेधेनेति तृतीयार्थमुपपादयन्नाह । विकल्पविषयस्येति । घटनि
निषेधवाक्यस्य निषेधप्रतियोगित्वेन घटे तात्पर्यसूचनायेत्यर्थः । यद्वा गुणत्वेन, कारणत्वे
कत्वम्, पूर्वोक्तनिषेधवाक्यस्यात्यन्तासत्प्रतियोगिकत्वरूपानिवृत्तिस्वरूपबोधफलकत्वम्,
—गुणानन्दः ।
(७) विकल्पेत्यादिना वक्राभिधानस्य प्रयोजनमुक्त्वा तस्य तात्पर्यविषयीभूतार्थम
त्तीति ।-गुणानन्दः ।
(८) निवृत्ति-कलि० मु० पु० पा० । (९) निवृत्ति-कलि० मु० पु० पा०
(१०) निवृत्ति-कलि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रूपानिरुक्तिर्वेति । आद्ये भावस्यैव(१) सदातन-
प्रसङ्गः । द्वितीये (तु) निवृत्तेरेवेति ।

दीधितिः ।

रूप्यत(२) इत्यर्थस्तु न युक्तः, वक्ष्यमाणसदातनत्वप्रसङ्गा-
क्तेः । भावप्रतिषेधेन क्वाचित्कत्व(३)कादाचित्कत्व(४)प्र-
षेधेन निवृत्तिस्वरूप(५)निरुक्तिरि(त्यर्थ इ)त्यन्ये । तच्चि-
न्त्यम् । प्रथमपक्षस्य क्वाचित्कत्वादि(६)प्रतिषेधरूपत्वाभावात् ।
दातनत्वेति सार्वत्रिकत्वस्याप्युपलक्षणम्(७) । निवृत्तेरिति ।
दातनत्वेत्यादिकमनुषज्यते ॥

दीधितिटिप्पणी ।

लीकत्वमेवार्थसिद्धम् । वक्ष्यमाणेति । निवृत्तेरेवेत्यनेन यन्निवृत्तेः
दातनत्वं वक्ष्यमाणं तस्यासङ्गतेः, तस्य देशकालसम्बन्धाभावे क-
सर्वकालवृत्तित्वरूपं सदातनत्वमापादितमित्यर्थः । क्वाचित्कत्वे-
। तथा च निवृत्तेः क्वाचित्कत्वादिप्रतिषेधेनार्थात् सार्वत्रिकत्व-
त्रेति, तथा चाग्रे तदापादनमविरुद्धमिति भावः । प्रथमपक्षस्ये-
। भवतु प्रथम एवेत्यादिना न घटनिवृत्तिः क्वापि कदापीति प्रथमप-
स्यैवायं विकल्पोऽवसीयते, तत्र च घटनिवृत्तेः सार्वत्रिकत्वं सार्व-
कालिकत्वं च प्रसिद्धम्, न तु कादाचित्कत्वादि, अतस्तद्विकल्पने त-
द्धनिषेधोऽनुपपन्न इत्यर्थः ? ॥

कल्पलता ।

एतदेव विभावयितुं शङ्कते । भवत्विति(८) ।
थम इति । न क्वापि भावनिवृत्तिरिति पक्ष इत्यर्थः ।
ऽयमिति । घटनिवृत्तिः क्वापि नास्तीति पक्ष इत्यर्थः ।

(१) भावस्य—पा० २ पु० । (२) निरूप्यत– कलि० मु० पु० पा० ।
(३) क्वाचित्कत्वम्, किञ्चिद्देशमात्रवृत्तित्वम् । (४) कादाचित्कत्वम्, किञ्चित्कालमात्रवृत्तित्वम् ।
(५) निवृत्तिस्वरूपम्, सर्वदेशकालवृत्तित्वम् ।
(६) प्रथमपक्षस्य कादाचित्कत्वादि—पुण० पु० पा० । (७) लक्षकम्—पुण० पु० पा० ।
(८) शङ्कते । अस्त्विति—पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

नास्तितास्वरूपनिरुक्तिरिति(१) । भावस्य ना
न (न) काचित्की न वा कादाचित्कीति(२) नास्ति
एव स्वरूपं निरुच्यत इत्यर्थः । आद्य इति । नि
रेवाभावपक्ष इत्यर्थः । द्वितीय इति । निवृत्तेः
त्रिकत्वसार्वदिकत्व(३)पक्ष इत्यर्थः । एवं सति
चिदपि(४) भावो न स्यादिति भावः ॥

अस्तु तर्हि तत्कार्यत्वमेव ध्रुवभावित्वम् । न ।
पि कार्य इति पक्षे विरोधात्, तस्यैव कार्य इत्यसि

दीधितिः ।

तस्यापी(५)त्यपिशब्देन यदि तदुत्तरभावि समुच्चेयं, त
विरोधादिति । असिद्धेरिति । अप्रसिद्धेरि(६)त्यर्थः । अथ
पिना हेत्वन्तरमात्रं समुच्चेयम्, अविवक्षितविशेषं तत्का

दीधितिटिप्पणी ।

ननु तस्यापीति पक्षेऽविरोध एव, कुतः, अपिः कारणतः पूर्व
व्यक्तिसमुच्चये,(तस्य च) क्षणिकत्वपक्षेऽपि निर्वाहेण प्रतियो
भाविभावानपेक्षत्वरूपसाध्यस्य तत्कार्यत्वरूपध्रुवभावित्वरूपस
सामानाधिकरण्यसम्भवादत आह। तस्यापीत्यपिशब्देन यदी
थापिनेति । तथा चोक्तरूपेण सामानाधिकरण्यसत्त्वादविरोध
र्थः । अविवक्षितेति । विशेषः तदुत्तरभावितदुत्तराभावि(त्व

(१) नास्तितास्वरूपनिरुक्तिर्वेति–पुण० पु० पा० । (२) न कादाचित्कीति–कलि० मु०
(३) सार्वत्रिकत्वसार्वत्रिकत्व—पा० २ पु० । (४) कदापि—कलि० मु० पु० पा०

(५) क्रियाजन्यविभागे तदितरकार्यत्वे सति तत्कार्यत्वमस्ति, अस्ति च तदु
हेत्वनपेक्षत्वमिति विरोधासङ्गतेराह । तस्यापीत्यादि ।—गुणानन्दः ।

(६) हेतोरप्रसिद्धत्वे स्वरूपासिद्ध्यसम्भवादाह । अप्रसिद्धेरिति ।—गुणानन्दः ।

(७) वक्ष्यमाणप्रकारद्वयस्य मूले साक्षादनभिधानान्न्यूनत्वापत्तिमाशङ्क्याभि
यपरतयाऽवतारयति । अथेत्यादि । हेत्वन्तरमात्रम्, न तु स्वोत्तरभावित्वेन विशेषितं ये
इति भावः । हेत्वन्तरसमुच्चये वैयर्थ्यमाशङ्क्याह । अविवक्षितेति । विशेषौ, समुच्चय
इत्याशयेनेत्यनेन वक्ष्यमाणयुक्त्याऽस्यानुकूलतर्कत्वं सूचितम् ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त् किञ्चिदुत्पन्नमात्रस्य कार्यम्, स एव तस्य

दीधितिः ।

त्रं वा हेतुरित्याशयेना(१)शङ्कते । यत्किञ्चिदिति । तद्व्यक्ति(२)-र्यत्वस्य सन्दिग्धव्यतिरेकतया(३) तत्सामग्रीकार्यत्वं हेतु-र्यं, परामर्शनीया(४) च तदा(५) तद्व्यक्तिसामग्री, तत्र च(६)

दीधितिटिप्पणी ।

कार्यत्वस्यैव हेतूकृतत्वात् तद्विहाय यस्याः सामग्र्या इत्येतद्विवरणं तत्समर्थमतः सङ्गत्या दर्शयति । तद्व्यक्तीति । कारणव्यक्तीत्यर्थः । स-न्दिग्धव्यतिरेकतया सन्दिग्धव्यभिचारतया । तत्पदस्य पूर्वं तत्का-रणव्यक्तेरेव वाचकतया यत्र कारणव्यक्तिसामग्रीकार्यत्वं तत्र त-त्कारणव्यक्तेरुत्तरभाविभावानपेक्षत्वमित्यर्थः स्यात्, तथा च तद्भूते कार्यस्वरूपनाशपक्षे कारणसामग्रीकार्यत्वेन कारणव्यक्तेरुत्तर-भाविभावानपेक्षत्वं साधनीयं, तथा च कारणसामग्रीजन्यकारणरू-पव्यक्तेः क्षणद्वयाद्यवस्थायित्वेऽप्युपपन्नं, तादृशसामग्रीकार्यस्य का-रणनाशव्यक्तेः कारणोत्तरभावव्यनपेक्षत्वस्य एकमात्रक्षणानवस्थायि-त्वेऽप्युपपत्तेरत आह । परामर्शनीयेति । तदा तच्छब्देन । तदतिरि-क्तसाधनानपेक्षमित्यत्र तच्छब्देन व्यक्तिसामग्री उक्ता, अतस्तद्व्य-क्तिसामग्रीकार्यस्य कारणव्यक्तेर्नाशस्य तत्सामग्र्युत्तरभाव्यनपेक्षत्वं सामग्रीनिविष्टकारणव्यक्तेरेकक्षणावस्थायित्व एव भवति, साम-ग्र्यनन्तरमेव तन्नाशादिति भावः । तत्र चेति । उक्तव्याप्तिर्मया अ-ङ्गीक्रियत एव, किं तु तद्व्यक्ति(नाश)रूपपक्षे तद्व्यक्तिसामग्रीजन्यत्वरूप-

(१) शयेन—पा० २ पु० ।

(२) तद्व्यक्तीत्यादि । एतत्प्रतियोगिको ध्वंसः नैतदुत्तरभाविहेत्वपेक्षः इति साध्ये तद्व्यक्तिकार्यत्वं सन्दिग्धव्यतिरेकतया सन्दिग्धव्यभिचारतया न हेतुरिति तत्सामग्रीकार्यत्वं हेतु-तदुर्थम्, तत्र तत्पदेन यस्य ध्वंसस्तत्परामर्शे विरोधात् तदव्यवहितोत्तरक्षणोत्पत्तिकं कार्यमेव परामर्शनीयम्, तेन तदव्यवहितोत्तरोत्पत्तिकसामग्रीजन्यत्वादिति फलति, अत्र व्याप्तिरस्ति, तु ध्वंसे पक्षे हेतोः सत्त्वमित्यर्थः ।—गुणानन्दः ।

(३) व्यभिचारतया—पुण० पु० पा० । व्यभिचारश्चैतदुत्तरवर्तिहेत्वनपेक्षत्वनिरूपितः सन्दिग्धः ।

(४) परामर्षणीया-कालि० मु० पु० पा० । (५) तच्छब्देन ।

(६) तत्र कालि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाश इति चेत्, तर्हि यस्याः सामग्र्या यत्र कार्यं तदति(१)रिक्तानपेक्षमिति साधनार्थः, तमिमं को नानुमन्यते(२)। कार्यमेव विनाश इति तु केनानु

दीधितिः।

व्याप्तिमनुमन्यामहे, न तु पक्षधर्मतामित्याह, तर्हीत्यादि यस्याः व्यक्तेः(३)। तदतिरिक्तेति तदुत्तरभाविपरम्। सामग्र्या यज्जन्यत इत्यर्थेऽप्येवमेव। केचित्तु यथाश्रुतस्य तस्यापि(४) कार्यं इत्यादेश्चानुरोधात्त(५)दितरकारण क्षत्वमेवाहेतुकत्वं वर्णयन्ति, तच्च पुञ्जात्पुञ्जोत्पत्तिं वदतो वै कस्य(६) क्वचिदपि वस्तुनि न प्रसिद्धं,(७)स्फुटतरवि

दीधितिटिप्पणी।

हेतुमत्त्वं नाङ्गीक्रियत इति पक्षधर्मताभावात् कथं नाशस्य त्वसिद्धिरित्यर्थः। तद्व्यक्तेः सामग्रीति शब्दतोऽर्थः कथं मतो यत्पदस्य व्यक्तिपरत्वमाह। यस्या इति। इदं पुनरत्र बो यत्पदस्य व्यक्तिपरत्वे तदतिरिक्तेत्यत्र तत्पदस्य सामग्रीपरा त्वानुपपत्तिरिति। ननु तत्पदस्य सामान्यपरामर्शकत्वात् यस्य सामग्रीविशेषणमेव युक्तं, तथा सामानाधिकरण्ये यया सा यज्जन्यत इत्येवार्थोऽस्त्वित्यत आह। ययेति। तदा च सा रामर्शानुपपत्त्या इत्यर्थः। एवमेव तद्व्यक्तिसामग्रीमादायैव स्या इति। यथाश्रुतस्येति। एतस्य तदतिरिक्तसाधनानपेक्षित तस्यापीत्यत्रापिना सामान्यतस्तदितरकारणमात्रस्यैव स यावगतेः। न प्रसिद्धमिति। सर्वस्यैव कार्यस्य तत्कारणव्यक्ति स्य पुञ्जप्रविष्टकारणान्तरस्यापेक्षणादित्यर्थः। स्फुटतरेति।

(१) तद—कलि० मु० पु० पा०। (२) नानुमनुते—पाठः।
(३) यस्याः व्यक्तेः—नास्ति पा० २ पु०।
(४) यथाश्रुतस्यैतस्यापि—कलि० मु० पु० पा०। (५) रोधा—कलि० मु० पु०
(६) तेषां मते पुञ्जघटकमेकमुपादानमितरान्निमित्तमिति भावः।
(७) प्रसिद्ध—कलि० मु० पु० पा०। अप्रसिद्धमित्यत्र उपेक्षितमित्यप्रेतनमनु —गुणानन्दः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवहर्तव्यम्, किं तद्विरहवत्त्वात् कार्यस्य, किं वा तद्विरहरूपत्वात्(१)।

दीधितिः।

भिचाराणां च तत्तादात्म्यतत्कार्यत्वतद्व्यापकत्वानां तत्र हेतुत्वाशङ्कनमनुचितमित्युपेक्षितम्। व्यवहर्त्तव्यम् स्वीकर्त्तव्यम्। तद्विरहरूपत्वादिति। तत्कार्य(२)स्तद्विरह(३)स्तद्विनाश इत्युभयसम्प्रतिपन्नत्वादिति भावः।

दीधितिटिप्पणी।

त्मनः सुतरां तदतिरिक्तानपेक्षत्वं अस्तीत्यर्थः। पूर्वं नानुमन्यत इति लिखनादाह। व्यवहर्तव्यमिति। तत्कार्य इति। तत्कार्यस्वरूपस्तद्विरहः स तद्विनाश इत्युभयमतसिद्धत्वेन तद्विरहरूपत्वं कार्यस्य सुतरामेवेत्यर्थः। अत्र चात्यन्ताभावादौ व्यभिचारवारणाय तत्कार्यत्वे सति तद्विरहरूपत्वमित्येवंरूपेण॥

कल्पलता।

तृतीयं ध्रुवभावित्वं दूषयितुमाह। अस्त्विति। एतद्घटध्वंस(४) एतदव्यवहितोत्तरक्षणोत्पत्तिकः, एतत्कार्यत्वात्, एतद्घट(स्व)रूपत्वादिति तावत्तव विवक्षितम्,(तदा) तत्र तत्कार्यत्वादित्यस्य तस्यापि(५) कार्यत्वादित्यर्थेऽपिशब्दे(न) कारणान्तरसमुच्चयश्चेत्त(व विवक्षितस्त)दा तद्विलम्बेन ध्वंसविलम्बे(न) तदुत्पत्त्यव्यवहितोत्तरक्षणोत्पत्तिकत्वं विरुद्धम्, तन्मात्र-

(१) रूपत्वात् कार्यस्य—पा० २ पु०।

(२) सम्भवदुक्तिकत्वं रचयति। तत्कार्य इति। तत्कार्यो यस्तद्विरहः, स तावत्तद्विनाश इति सर्वानुमतम्, तथा च तत्कार्यत्वावच्छेदेनैव तद्विनाशत्वमिति भावः।—गुणानन्दः।

(३) तत्कार्यतद्विरह-पुण० पु० पा०। (४) एतत्पटध्वंसः—पाठः।

(५) तत्कार्यत्वादिति तस्यापि—कलि० मु० पु० पा०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

कार्यत्वं च हेतुः स्वरूपासिद्ध इत्यर्थः । यद्वा एत
ध्वंस एतन्मात्रहेतुकः, तत्कार्यत्वादित्यत्र वि
सिद्धी विकल्पतो(१) द्रष्टव्ये । असिद्धेरिति ।
रादेरपि घटनाशं प्रति कारणत्वदर्शनादित्यर्थः ।
तस्यापि वा तस्यैव वेति न(२) समुच्चयो न
नियमो विवक्षितः, किन्तूत्पन्नमात्रस्य यत्कार्यं
तस्य विनाश इति मम मतम्, तदतिरिक्ते
मानाभावादिति शङ्कते । यत्किञ्चिदिति । त
कार्यं कारणातिरिक्तानपेक्षमित्यहेतुकत्वार्थः, त
च(४) कारणपदेन यदि सामग्री विवक्षिता,
सिद्धसाधनम् । तदेकदेशश्चेत्, तदा बाधः(५),

'न किञ्चिदेकमेकस्मात्(६) सामग्र्याः सर्वसम्भ
इति तवाभ्युपगमात् । एवमभ्युपगमे(७)ऽप
द्धान्तो माभूदत आह । (८)को नाम नानुमन्यत इ
कार्यमेवेति ।(९) कार्यमात्रस्य विनाशित्वाभ्युप
मम प्रौढिवादेनेति भावः । कार्य(स्य) कारणविना
त्मकत्व(१०)व्यवहारबीजं विकल्पयति । किमि
तद्विरहवत्त्वात् कारणान्योन्याभाव(व)त्त्वात् । त
हरूपत्वात् कारणविरहात्मकत्वात्, कार्यस्येत्यर्थः

(१) विकल्पिते—कलि० मु० पु० पा० । (२) वेति—पा० २ पु० ।
(३) दिति । न हि—पुण० पु० पा० । (४) तदत्र—कलि० मु० पु० पा० ।
(५) बाधः, कार्यस्य कारणविनाशात्मकत्त्व—पा० २ पु० ।
(६) देकमकस्मात्—पुण० पु० पा० । (७) भ्युपगमो—कलि० मु० पु० पा०
(८) आह । कार्यमेवेति—पुण० पु० पा० ।
(९) कार्यमेवेति ।—नास्ति पा० पुण० पु० । (१०) त्मक—पा० २ पु० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न तावत् पूर्वः, सहकारिष्वपि तथाप्रसङ्गात्(१), विरहस्वरूपानिरुक्तेश्च(२)। न द्वितीयः, स हि कार्यकाले कारणस्य योग्यानुपलम्भनियमाद्वा भवेत्, व्यवहारानुरोधाद्वा, अतिरिक्तविनाशे बाधकानुरोधाद्वेति ।

दीधितिः ।

विरहस्व(३)रूपेति । विरहो यद्यभावः, स भवतामलीक इति कथं तद्वृत्ता वस्तुनः कार्यस्य, सदसतोः संसर्गनिषेधात् । अथाधिकरणस्वरूपः, कथं तेनैव तद्वृत्ताऽसाधारण्यं चे(४)त्यर्थः । स हीति । सः द्वितीयः, कार्यस्य तद्विरहरूपत्व(५)रूपः ॥

दीधितिटिप्पणी ।

असाधारण्यञ्चेति । तद्विरहरूपत्वेन तन्नाशत्वसाधने हेतोः पक्षमात्रवृत्तितया सपक्षादिव्यावृत्तत्वमित्यर्थः । स इत्यनेन द्वितीयस्य तद्विरहरूपत्वस्य परामर्शान्नपुंसकता स्यात्, अत आह । स इति ॥

कल्पलता ।

तथाप्रसङ्गादिति(६)। वेमादावपि(७) तन्तुविनाशव्यवहारप्रसङ्गात्(८), तदन्योन्याभाववत्त्वस्य (तत्र)

(१) तथाभावप्रसङ्गात्—पा० २ पु०। तथाव्यवहारप्रसङ्गात्—पुण० पु० पा०। सहकारिष्वपीति मूलम्, तेषामपि तदत्यन्ताभाववत्त्वादिति भावः। अत्र सहकारिपदं तद्विरहवदुदासीनाद्युपलक्षणमिति ध्येयम्—गुणानन्दः।

(२) विरहरूपानिरुक्तेश्च—पा० २ पु०। विरहस्वरूपानिरुक्तेः—पुण० पु० पा०।

(३) विरह—कलि० मु० पु० पा०।

(४) ऽसाधारण्यं वे- कलि० मु० पु० पा०। ननु प्रतियोगित्वादेः प्रतियोग्यात्मकत्वेपि [illegible]ा तेन रूपेण तद्वृत्ता, तथा प्रकृतेऽपि स्यादित्यनुशयादाह। असाधारण्यं चेति। अधिकरणा[illegible]करवे तद्विरहस्य तद्विरहवत्त्वं तद्व्यक्तित्वपर्यवसन्नमेव, तच्च कालान्तरे तद्विनाशत्वेनोभयसम्प्रपन्नात्सपक्षाद्व्यावृत्तमित्यर्थः।—गुणानन्दः।

(५) रूपस्व-कलि० मु० पु० पा०।

(६) तथा च सङ्गादिति—पा० २ पु०। तथाभावप्रसङ्गादिति—पुण० पु० पा०।

(७) दिति। रोमादावपि—पुण० पु० पा०।

(८) तन्तुविनाशव्यवहारप्रसङ्गात्—कलि० मु० पु० पा०। तु तन्तुविनाशप्रसङ्गात्—२ पु०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्त्वादित्यर्थः । विरहस्वरूपेति । विरहो ह्यभा
स चालीक एवेति तद्वत्ता कार्यस्य (स्वलक्षणस्य)
भवेदिति भावः । यद्वा कारणविरहो यदि कार्य
तदा कथं तेनैव तद्वत्ता, अतिरिक्तश्चेत्तद(१)भावः,
किमपराद्धं कार्यातिरिक्तेन(२) ध्वंसेनेति भावः ।
द्वितीय इति । यद्यपि भावस्याभावतादात्म्यनिषे
वैतदपि निरस्तम्, तथापि प्रकारान्तरेणा(३)
निरस्यति । न द्वितीय इति । स इति(४) । द्विती
पक्ष इत्यर्थः । कार्यकाले कारणं(५) सर्वथापि नोपल
इति मूलम्, कार्यमेव कारणविनाश इत्यर्थः । अति
क्तेति । कार्यातिरिक्त इत्यर्थः(६) ॥

न प्रथमः, उपलभ्यन्ते हि पटकाले वेमाद
न ते त इति चेत्, किमत्र प्रमाणम् । अभेदेऽपि(७)
किं प्रमाणमिति चेत्, मा भूत् तावत्, सन्देहस्थि
त्वपि अनुपलब्धिबलावलम्बन(८)विलयात् ।

दीधितिः ।

न ते त इति । उपलभ्यमाना वेमादयः पटपूर्वकालीनेभ्यो(९)
भिन्ना इत्यर्थः ॥

---

(१) श्चेद—कालि० मु० पु० पा० । (२) कार्यस्यातिरिक्तप्र—कालि० मु० पु
(३) प्रकारान्तरेण—पुण० पु० पा० ।
(४) न द्वितीय इति । म इति—कालि० मु० पु० पा० । (५) कारणत्वं—पा०
(६) अतिरिक्तेति । कार्यातिरिक्त इत्यर्थः—नास्ति पा० २ पु० । अतिरिक्तेति ।
तिरिक्तेत्यर्थः—पुण० पु० पा० ।
(८) लालम्ब—पा० २ पु० । लालम्बन—कालि० मु० पु० पा० । (७) अभेदे—पा० २ पु० ।
(९) कारणपदस्य फलोपधायकपरत्वमभिप्रेत्याह । पटपूर्वकालीनेभ्य इति ।—पुण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता।

ननु पटकाले ये वेमादय उपलभ्यन्ते ते(१) तद्भिन्ना एवेति शङ्कते। न ते त इति। क्षणभङ्गे सत्येवं (न) स्यात्, स चाद्यापि न सिद्ध इत्यभिप्रायेणाह। किमत्रेति। यद्यपि प्रत्यभिज्ञा(नं) तत्र मानं(२), तथापि तदनुपदर्शनेऽपि न(३) क्षतिरित्याशयेनाह। मा भूदिति। कार्यकाले कारणानुपलम्भः सन्दिग्ध इति तद्बलं तव भग्नमेवेत्यर्थः॥

न द्वितीयः, न हि पटो जात इत्युक्ते तन्तवो नष्टा इति कश्चिद्व्यवहरति। पटस्यानतिरेकात् तन्तुमात्रजन्मनि च(४) भेदाग्रहादव्यवहार इति चेत्, न तर्हि व्यवहारबलमपि(५)। विसभागसन्ततौ तावद्व्यवहार-

---

दीधितिः।

पटस्येति। तथोत्पन्नाना(६)मेव तन्तूनां(७) पटत्वात्, तेषां च सौसादृश्येन भेदाग्रहात्त(८)ज्जन्यत्वाग्रहेण न विनाशव्यवहार इत्यर्थः। विसभागेति। समानाः सदृशाः भागाः सान्तानिका यस्याः सा सन्ततिः सभागा, विसदृशसान्तानिका च(९) विसभागा, काष्ठाङ्गारादिसन्ततावङ्गारादिजन्मनि काष्ठा-

दीधितिटिप्पणी।

परतन्तुतो भेदाग्रहात्। सान्तानिकाः सन्ततिप्रविष्टा व्यक्तयः। पूर्वतन्तुनोत्तरतन्तुसन्तानं जन्यते, सा सभागसन्ततिः, यत्र च काष्ठा-

---

(१) ते-नास्ति पा० २ पु०। (२) तत्र प्रमाणम्-पुण० पु० पा०।
(३) न-नास्ति पा० २ पु०। (४) जन्मनि—कलि० मु० पु० पा०।
(५) व्यवहारावलम्बनमपि—पा० २ पु०।
(६) तथोत्पन्नानाम्, पटकार्यावरणादिकुर्वद्रूपाणाम् —गुणानन्दः।
(७) त्पन्नानां तन्तूनामेव-पुण० पु० पा०। (९) च-नास्ति पा० २ पु०।
(८) भेदाग्रहा-कलि० मु० पु० पा०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बल(१)मस्तीति चेत्, नैतदेवम्, यदि हि तन्तुमाल
पटनिवृत्तिः, (तर्हि)(२) कथं तदाश्रयस्तदात्मको

दीधितिः ।

दिविनाशव्यवहारात् कार्यस्य(३) विनाशत्वस्थितौ सभाग
न्ततावपि कार्यमेव विनाशत्वेन कल्प्यते, बाधकाभावादित्यर्थः
एकत्र बाधकबलादतिरिक्ते विनाशे सिद्धे विसभागसन्तानें
तथैव(४) कल्प्यत(५)इत्याशयवान् बाधकमाह । यदि हीति
तन्तुभिन्नत्वाभिन्नत्वविप्रतिपत्तावपि दुरपह्नवस्तावत्सर्वा(६)नु
वसिद्धः पटो धर्मी, भवितव्यं च तस्यावश्यं कादाचित्कस्य सतो
विनाशेन, स चेदतिरिक्तः, सिद्धमीहितम् । अथ तन्तुमा
(-मात्रं), किं वा तद्विशेषः। आद्ये(८), कथमिति। तदाश्रय

दीधितिटिप्पणी ।

दिनाङ्गारादि जन्यते, तत्र विसभागसन्ततिः, कार्यस्य विनाश
स्थिताविति । तदानीं विनाशव्यवहारस्य सत्त्वेन कार्यमेव ला
वात्तत्त्वेन कल्प्यत इति भावः । एवञ्च व्यवहारात्(९) का
काले व्यवहारानुरोधादित्येव व्याख्या, न तु कार्यस्य व्यवहार
इत्यादिः । काष्ठाङ्गारेपि तद्व्यवहारस्योभयासम्मतत्वादिति बोध्य
यदि हीत्यादि मूलं पूर्वपक्षं प्रति अन्यद् भुक्तमन्यदित्यादिवद्भास
ऽतो व्यक्तिकृतन्तु नाद्यापीत्याद्यनुमेयमाशयमाह। एकत्रेति । तथा
त्वया दृष्टान्तेन सभागेऽनतिरिक्तनाश आनेयः, तथा मयापि तव
पक्षपक्षयोर्व्युत्क्रमेणातिरिक्तो विसभागेप्यानेय इत्यर्थः। सौष्ठवं का
ति । तन्तुभिन्नत्वेत्यादि । अथ तन्तुमाला तन्तुमालात्वावच्छिन्न
तद्विशेषः तन्तुमालाविशेषः । कथमितीति । तथा च मूलस्यायम

(१) सन्ततौ कथञ्चिद्व्यवहारावलम्बन-पा० २ पु० । (२) तर्हि-नास्ति पा० कलि० मु०
(३) कार्यस्येत्यादि । अत्र कार्यद्वये विनाशद्वये च तदित्यादिः ।—गुणानन्दः ।
(४) तथैव, विनाशस्य तदतिरिक्तत्वमेव ।—गुणानन्दः ।
(५) कल्पनात्-पा० २ पु० । (६) सर्वजना-पुण० पु० पा० ।
(७) सतः, भावस्य । एतच्च स्वमते ध्वंसे व्यभिचारवारणाय ।—गुणानन्दः ।
(८) आद्ये, तन्तुमालासामान्यस्य पटध्वंसात्मकत्वे ।—गुणानन्दः ।
(९) व्यवहारानुरोधात्—इत्यादर्शपुस्तके २ पु० च पाठः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पटः प्राक् । अन्यैवासाविति चेत्, न तावज्जातिकृतमन्यत्वमुपलभ्यते(१) । व्यक्तिकृतं तु नाद्यापि(२) सिद्ध्यति । इत एव(३) तत्सिद्धावितरेतराश्रयत्वम् । तथापि यद्येवं(४) (स्यात्) कीदृशो दोष इति चेत्,

दीधितिः ।

स्वमतेन । तदात्मक इति परमतेन । द्वितीयं शङ्कते । अन्यैवेति । पटाकारेभ्य(५)स्तन्तुभ्योऽन्यैव तदुत्तरकालीना तन्तुमालेत्यर्थः । इत एवेति । वर्तमानतन्तुमालायाः पूर्वकालीनतन्तुमालाव्यावृत्ते(६) पटनाशात्मकत्वे सिद्धे भेदसिद्धिः, सिद्धे च भेदे तत्सिद्धिरित्यर्थः ।(७) नन्वेवमपि सन्देहे(८) न बाधकबलमत आह ।

दीधितिटिप्पणी ।

यदि तन्तुमालात्वावच्छिन्ना एव तन्तव एव पटनिवृत्तिस्तदा कथं तन्तुमालापुञ्जात्मकपटः स्वकालेपि वर्तेत, तदानीमपि स्वनिवृत्तिरूपतन्तुमालासत्त्वादित्यर्थः । स्वमतेन न्यायमतेन । पटे तन्तव इति प्रतीत्या तन्तुमालाया अपि पटवृत्तित्वात् । यद्वा तदाश्रय इति बहुव्रीहिः । एतदुपादानं च पटकालेपि तन्तोरावश्यकत्वबोधनाय । द्वितीयम् तन्तुमालाविशेष एव पटस्य नाश इति पक्षम् । मूले, इत एव तन्तुमालायाः पटनाशत्वादेव । तत्सिद्धिः तन्तुमालायाः पटनाशात्मकत्वसिद्धिः । नन्वेवमपीति । प्रमाणाभावादिनापि तस्य सन्देह एवापतितः, एवमस्ति न वेतिसन्देहनिरासकं

(१) मन्यदुपलभ्यते—पाठः । (२) व्यक्तिकृतं त्वयापि न—पा० २ पु० ।

(३) अत एव—कलि० मु० पु० पा० ।

(४) उत्तरकालीना तन्तुमाला पूर्वमालातो भिन्ना नाशरूपा चेति स्वीकार इत्यर्थः ।

(५) पटाकारेभ्य इति सौसादृश्यतिरस्कारनिवृत्तये । तत्पटाकारेभ्य इति वाऽर्थः । तेन नाग्रे जातिकृतान्यत्वानुपलम्भविरोधः ।—गुणानन्दः ।

(६) न्यावृत्तेः—कलि० मु० पु० पा०, पुण० पु० च ।

(७) रित्यर्थः । एवम् उत्तरतन्तुमालायाः पूर्वतन्तुमालानिवृत्तित्वे ।—पा० २ पु० ।

(८) सन्देहे, उक्तप्रणाल्या तत्कार्यस्य तद्भिनाशत्वसन्देहे । बाधकबलम्, तत्कार्यत्वेन तद्भिनाशत्वे साध्ये न बाधः, प्रत्युतसन्देहस्यापतिबन्धकत्वादिति भावः ।—गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न कश्चित्, केवलं प्रमाणाभावः, व्यवहारान(१)नुरोधश्च, तदसिद्धावपि सिद्ध्यतस्तस्य निमित्तान्तरा(२)पेक्षणात् ।

दीधितिः ।

तदसिद्धावपीत्यादि । उपलक्षणं चैतत् । तत्सिद्धा(३)वप्यसिद्ध्यत इत्यपि द्रष्टव्यम् । पटो हि यादृशस्तादृशो भवतु, गृह्यते तावत् तन्तुभ्यो भिन्नत्वेन तज्जन्यत्वेन(४) च, न च तथापि तन्तुविनाशबुद्धिव्यपदेशौ भवतः, भवतश्च तन्तुमालायाः पूर्वतन्तुनिवहा(५)भिन्नत्वे(न) गृह्यमाणेऽगृह्यमाणे च पटजन्यत्वे(६)

दीधितिटिप्पणी ।

बाधकं न दत्तमित्यर्थः । अन्वयव्यभिचारादाने मूलस्य न्यूनतां परिहरति । उपलक्षणं चैतदिति । तदसिद्धावपीति मूलं, भवन्मतसिद्धनाशव्यवहारहेतोस्तद्भिन्नतन्तुमालाज्ञानस्यासिद्धावपि सिद्ध्यतस्तस्य व्यवहारस्य कारणान्तराधीनत्वं, न त्वेतत्कारणाधीनत्वमित्यर्थः । उपलक्ष्यं उपलक्षणं च विशदयति । पटो हीत्यादि । यादृशस्तादृशः तन्तुस्वरूपोऽतिरिक्तो वेत्यर्थः । ननु तद्भिन्नत्वे सति तज्जन्यत्वज्ञानमेव तन्नाशव्यवहारकारणं वाच्यमत आह । तज्जन्यत्वेन चेति । तदसिद्धावपीति मूलस्यार्थं विशदयति । भवतश्चेति । तावित्यन्वयि । पटाद्द्वितीयक्षणवृत्तितन्तुमालायाः पटस्वरूपपूर्वतन्तुनिवहेन सहाभेदे गृह्यमाणेपि वास्तवपटनाशे पटस्य नाशबुद्ध्युदयात् व्यभिचारेण नेदं पटनाशबुद्धिकारणमित्यर्थः । ननु पटजन्यत्वज्ञानाधीनमेव तदा पटनाशज्ञानं स्यादत आह । अगृह्यमाणे चेति । तत्रापि तन्तुमालायाः पटजन्यत्व इत्यन्वयि । ननु तदा तन्तुमालामादाय

(१) व्यवहारा—पा० २ पु० । (२) निमित्तान्तरान—पा० २ पु० ।
(३) चैतत् सिद्धा-पा० २ पु० । (४) तन्तुभिन्नत्वेन तन्तुजन्यत्वेन—पुण० पु० पा० ।
(५) तन्तुविरहा-कालि० मु० पु० पा० ।
(६) अयमेव पाठष्टिप्पणीकृन्मतः । पटजन्यत्वेना—कालि० मु० पु० पा० । पटजन्यत्वेऽ पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिः ।

भावात्मनि च पटजन्यान्तरे पटस्य ताविति सिद्धयति कार्याद्भा-वा(१)दन्य एव भावस्य विनाश इत्यर्थः ॥

दीधितिटिप्पणी ।

पटनाशबुद्धिर्न भवति, किन्तु पटजन्यभावान्तर एव सा भविष्यती-त्यत आह । भावात्मनीत्यादि । भावात्मनि च पटजन्यान्तरेऽगृह्य-माणे चेत्यर्थः ॥

कल्पलता ।

अवयवेभ्योऽनन्यत्वमवयविन इति पक्षमादाय शङ्कते । पटस्येति । कारणाभावत्वेन व्यवहर्तुं यो-ग्येऽपि पटे तन्त्वात्मके पूर्व(२)तन्तुभेदाग्रहान्न तथा व्यवहारः, येन तु परीक्षकेण भेदो गृह्यते, तस्य तथा व्यवहारोऽस्त्येवेति भावः । व्यवहारो हि(३) लौकिकपरीक्षकसाधारणः प्रमाणं, स च प्रकृते नास्तीत्याह । न तर्हीति । परीक्षकस्य विपरीत एव व्यवहारो न कथमत्रेति भावः । ननु पटे नष्टे तन्तु-मालालक्षणं कार्यं यत्र(४) जायते तत्र पटनाशप्रती-तिव्यवहारौ स्त एवेत्याह । विसभागेति । (वि)स-भागसन्ततावप्येतद्दृष्टान्तेन तथोन्नेयमिति हृदयम् । यदि हीति । तन्तुमालायां पटस्तावद्वर्त्तत इत्यनुभव-सिद्धम् । सा चेत्तन्तुमाला पटनिवृ*(५)त्तिः स्यात्(६), तदा स्वध्वंस एव पटो वर्त्तत इत्यायातमिति स्वमते । परमते त्वाह । तदात्मको वेति । पटोपि

---

(१) कार्यभावा-कलि० मु० पु० पा० । (२) पटे च तन्त्वात्मकपूर्व-पुण० पु० पा० ।
(३) व्यवहारोपि-पा० २ पु० । (४) यत्र-नास्ति पा० २ पु० ।
(५) एतत्पुष्पिकामारभ्याग्रिमपुष्पिकाचिन्हपर्यन्तो ग्रन्थः पुण० पु० नास्ति ।
(६) निवृत्तिः-पा० २ पु० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

तन्तुमाला, पट(१)निवृ*त्तिरपि(२) तन्तुमाला, तथा च प्रतियोग्यात्मिकैव निवृत्तिः स्यादिति विरोध इत्यर्थः। ननु पूर्वतन्तुमालाया उत्तरतन्तुमाला अन्यैव, तथा च कथमयं विरोध इति शङ्कते । अन्यैवेति। तद्विजातीया वा तद्भिन्ना वा । नाद्यः, तथाऽननुभवात् । नान्त्यः, क्षणभङ्गासिद्धेरिति परिहरति। न तावदिति। यद्यपि जातिकृतान्यत्वं व्यक्तिकृतान्यत्वे सत्येव, न ह्येकस्यां व्यक्तौ क्रमेण जातिभेदः सम्भवतीति पृथग्विकल्पानुपपत्तिः, तथाप्युपपत्ति(३)सौकर्यादेतदुक्तम् । इत एवेति(४)। उत्तरतन्तुमाला पूर्वतन्तुमालातो भेद एव सति तन्निवृत्तिरूपा भवति नान्यथेति तत्सिद्धिरित्यर्थः । इतरेति(५)। पूर्वापरतन्तुमालयोर्भेदे सति निवृत्तिरूपत्वं, निवृत्तिरूपतायां च सत्यां भेद इत्यन्योन्याश्रय इत्यर्थः । एवमिति। यदि(६) उत्तरतन्तुमाला पूर्वतन्तुमालानिवृत्तिः(७) स्यात्, को दोषः, तदा(८) निवृत्त्यन्तरस्वीकारे गौरवमिति(९) भावः। प्रमाणाभाव इति। उत्तरतन्तुमालायाः पूर्वतन्तुनिवृत्तिरूपत्वे तद्भिन्नत्वे(१०) च प्रमाणाभाव इत्यर्थः। न वा ईदृशो(११) व्यवहार इत्याह। व्यव-

(१) पट–नास्ति पा० २ पु० ।

(२) इत आरभ्य द्वितीयपुस्तकं बहुदूरपर्यन्तं खण्डितमिति पुणतामकरपुस्तकमेवाग्रेतन-कल्पलताग्रन्थमुद्रणे शरणीकृतम् ।

(३) तथाप्युत्पत्ति-पुण० पु० पा० । (४) इत एवेति–नास्ति पा० कलि० मु० पु०

(५) रित्यत्राह । इत एवेति-कलि० मु० पु० पा० ।

(६) यदि—नास्ति कलि० मु० पु० । (७) मालाविनाशः—पुण० पु० पा० ।

(८) को दोषो-कलि० मु० पु० पा० । (९) गौरवादिति-इति पाठो युक्ततरः ।

(१०) रूपत्वे भिन्नत्वे-कलि० मु० पु० पा० । (११) तादृशो– पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

हारेति । तदसिद्धाविति । यत्राश्रयनाशादेव पटनाशस्तत्र तन्तुमालाया अ(प्र)सिद्धावपि पटनाशव्यवहारो निमित्तान्तरात् पटध्वंसरूपादेव वक्तव्य इत्यर्थः । तन्तुमालाया निवृत्तिरूपत्वासिद्धावपीत्यन्ये ॥

अपि च तन्तुविनाशः सामान्यतस्तन्तुविरहस्वभावो वा स्यात्, तद्विपरीतो वा । आद्ये कथं तन्त्वन्तरं, न हि सामान्यतो नीलमनीलविरुद्धस्वभावमनीलान्तरम् । द्वितीये

दीधितिः ।

सभागसन्ताने कार्यस्य विनाशत्वे बाधकान्तरमाह । अपि चेति । सामान्यतः तन्तुविनाशत्वेन । तन्तोः तन्तुसामान्यस्य, विरहः अन्योन्याभावः, स्वभावो(२) यस्य स तथा । तन्तुविनाशः तन्तुविनाशत्वावच्छेदेन तन्तुसामान्यभिन्नस्तन्तुसामान्याभिन्नो वेति विकल्पार्थः । आद्य इति । तत्सामान्यभिन्नत्वावच्छेदकरूपवतस्तद्विशेषत्वायोगात्, न ह्यनीलसामान्यभिन्नत्वावच्छेदक(रूप)नीलत्ववन्नीलमनीलविशेषो भवितुमर्हतीत्यर्थः । विरोधः(३) भेदः । द्वितीये भस्मादिलक्षणविसभागसन्तानीयस्तन्तुविनाशः

दीधितिटिप्पणी ।

तन्मते तन्तुनाशत्वावच्छेदेनापि तन्तुविशेषस्यान्योन्याभावसत्त्वेपि सामान्यावच्छिन्नान्तरत्वमस्य व्याहतमित्यत आह । सभागसन्तानत्वोस्तन्तुसामान्यस्येति । द्वितीये अभेदपक्षे ।

(१) स्वभावः, धर्मः । तन्तुविनाशत्वं तन्तुसामान्यभेदव्याप्यं तदभेदव्याप्यं वेति फलितम् ।— गुणानन्दः ।

(२) नीलानीलयोरेकत्र समावेशात् कथं विरोध इत्यत आह । विरोधो भेद इति । विरुद्धस्वभावमित्यत्र मूले विरोधो भेद इत्यर्थः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथं तद्विरोधी, न हि नीलं सामान्यतोऽपि नीलान्तरविरोधि । विशेष(मात्र) एवायं विरोध(१) इति चेत्, तत् किं सामान्यतोऽनुभयस्वभाव(२) एव (वि)ना-

दीधितिः ।

कथं तन्तुसामान्यविरोधी(३), तत्सामान्याभिन्नत्वावच्छेदकरूपवतस्तत्सामान्यभिन्नत्वायोगात्, न हि नीलसामान्याभिन्नत्वावच्छेदकनीलत्वशालि नीलं नीलसामान्यभिन्नमित्यर्थः(४)। नील पीतादि(५)वत्तन्तुतद्वि(६)नाशयोः सामान्यतो न विरोधो(७)ऽविरोधो वा, अ(८)पि तु व्यक्तिविशेषयोरेवेति न तन्तुविनाशस्य तन्तुविशेषत्वानुपपत्तिरित्याशङ्कते । विशेष(मात्र) एवेति । यथा भवतां(९) जन्यविनाशिनोः, अस्माकं वा कलमाङ्कुरकुर्वद्रूपयोः(१०) सामान्यतो न विरोधो नाप्यविरोधः, क्वचित्समावेशस्य मिथो व्यभिचारस्य च दर्शनात्, तथा तन्तुतद्वि(११)नाशयोरपीत्यभ्यु-

दीधितिटिप्पणी ।

नात्मकनाशस्य तदविरोधितया तद्विरोधित्वं कथमिति वक्तुं न शक्यत इत्यतः, भस्मादीति । तन्तुसामान्यविरोधी तन्तुसामान्य-

(१) विशेष एवात्र विरोध-पाठः ।

(२) नुभयस्वरूप-पुण० पु० पा० । नुभवस्वभाव-पा० २ पु० ।

(३) विरोधी, भिन्नः ।

(४) मिति—पुण० पु० पा० । नीलसामान्यभिन्नामिति । तथा च नीलान्तरविरोधीति मूलस्य नीलविरोध्यन्तरं नीलविरोधिविशेष इत्यर्थोऽवसेयः ।—गुणानन्दः ।

(५) नीलपीतादीति गुणपरं व्यतिरेके दृष्टान्तः । द्रव्यपरत्वे त्वन्वयेपि दृष्टान्तत्वसम्भवः ।—गुणानन्दः ।

(६) तन्तुवि—कालि० मु० पु० पा० ।

(७) न विरोध इति । तन्तुविनाशत्वं न तन्तुसामान्यभिन्नत्वावच्छेदकमित्यर्थः ।—गुणानन्दः ।

(८) न विरोधोऽ—कालि० मु० पु० पा० ।

(९) तन्मते ध्वंसप्रागभावयोरातिरिक्तयोरनुपगमादाह । भवतामिति । —गुणानन्दः ।

(१०) कलमत्वावच्छेदेन नाङ्कुरकुर्वद्रूपत्वम्, न वा तदवच्छिन्नभेदः, एवमङ्कुरकुर्वद्रूपत्वावच्छेदेनापि नैतदुभयमित्यर्थः ।

(११) तन्तुवि—कालि० मु० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रः। ओमिति ब्रुवतोऽन्यतरमुपादाय(१) विनाशव्य-
वहारानुपपत्तिः। सामान्यस्यालीकत्वात् तत्र विरोधोऽपि
कैं करिष्यतीति चेत्, विलीनमिदानीं विरुद्धधर्माध्यासेन

दीधितिः।

ग्रमेऽन्यतरं(२) तन्तु(३)मादायाऽनुगततन्तुविनाशव्यवहारानुप-
पत्तिरित्याह। ओमितीति। ननु न तन्तुसामान्यं (न) तन्तुमात्रं(४)
वा तन्तुविनाशव्यवहारनिमित्तम्, आद्ये(५) तन्तु(तन्तु)भस्मनो-
र्व्यभिचारात्, परं तु(६) सभागो विसभागो वा तत्कार्यसन्तान
एव(७), एवमन्यत्रापीति चेन्न(८)। सन्तान(त्व)स्य दुर्वचत्वात्।
ननु तन्तुत्वादि(९)सामान्यस्यालीकत्वान्न पारमार्थिको(१०)नुगत-
तन्तुविनाशव्यवहार इत्याशयेना(११)शङ्कते। सामान्यस्येति(१२)।

दीधितिटिप्पणी।

भिन्नः। उभयत्रैव यथासङ्ख्येन हेतुमाह। क्वचिदित्यादि। अन्यतर-
मिति। सभागविसभागयोर्मध्ये एकतरो यस्तन्तुस्तमादायानुगतो
यस्तन्तुविनाशव्यवहारस्तदनुपपत्तिरित्यर्थः, तन्तुं विनापि भस्मादि-
कमादाय तद्व्यवहाराद्, उभयस्यैव च तत्कल्पने अनुगतो व्यवहारो न
स्यादित्यर्थः। यथायथं व्यभिचारमाह। आद्येति। तत्कार्येति। तथा
च तत्कार्यसन्तानत्वमेवानुगतव्यवहारनिमित्तमिति भावः। न पारमा-
र्थिक इति। तथा च पारमार्थिक एव व्यवहारे अननुगतत्वादिदोषो

(१) न्यतरमादाय—पुण० पु० पा०। (२) ऽन्यतर—कलि० मु० पु० पा०।
तथा चाननुगतेषु तेषु कथमनु-
(३) तन्तुमित्युपलक्षणम्। भस्मादिकमित्यपि बोध्यम्,
(४) तन्तुमात्रम्, तन्तुरेव।—गुणानन्दः।
व्यवहार इति भावः।—गुणानन्दः।
(५) आद्ये—कलि० मु० पु० पा०। (६) परं तु, किन्तु।
(७) सन्तानः—पुण० पु० पा०। तत्कार्यस्य क्षणिकतयाऽवन्तरमपि तद्विनाशव्यवहारादुक्तम्।
सन्तानेति।—गुणानन्दः। (८) ति चेत्,—पुण० पु० पा०।
(९) तन्तुत्वादीति। आदिपदात्तत्कार्यसन्तानेष्वपि नानुगतस्तद्विनाशत्वव्यवहार इति लभ्य-
ते।—गुणानन्दः। (१०) लीकत्वादुपाधिसाहित्येना—कलि० मु० पु० पा०।
(११) इत्याशयेन—कलि० मु० पु० पा०। (१२) सामान्येति—पा० २ पु०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भेदप्रत्याशया, तस्य तदाश्रयत्वात् ।

दीधितिः ।

अपिकाराद(१)विरोधश्च(२)। तस्येति । तस्य भेदसिद्ध्युपयोगिनो विरोधस्य, तदाश्रयत्वात् सामान्याश्रयत्वात् । सामान्यम्(३) अनुगतो धर्मः । अयमर्थः(४), एकमात्रवृत्तिधर्मयोर्विरोधो नाश्रयभेद(५)मगृहीत्वा शक्यग्रहः, गृहीते तु तस्मिन् विरोधानुधावनमनर्थकम् , अतः सामान्ययोः(६) सामान्यावच्छिन्नयोर्वा आश्रयान्तरे विरोधो ग्रहीतव्यः(७), तच्चेदलीकत्वया न विरो-

दीधितिटिप्पणी ।

दीयत इति विचार्यत इति भावः । तदधीनत्वात् सामान्याधीनत्वात्, सामान्यस्यालीकत्वे तादृशविरोधासिद्ध्या न भेदासिद्धिः(८) स्यादित्यर्थः । ननु सामान्यस्यालीकत्वे कथं विरुद्धधर्माध्यासाधीनयावद्भेदानुपपत्तिः, सामान्यानधीनयोस्तत्तद्व्यक्त्योर्विरुद्धधर्माध्यासेन भेदयोरेव रक्षणादत आह । अयमर्थ इति । अनर्थकमिति । विरोधकार्यस्य सिद्धत्वादित्यर्थः, तथा च तत्तद्व्यक्तिभेदो न विरुद्धधर्माध्यासाधीन इति भावः । आश्रयान्तर इति । घटत्वपटत्वयोरेकभूतलस्थिते घटपटरूप एषां विरोधो यदवधार्यते तत्तादृशसामान्यभेदासिद्धिं वि-

(१) न्यूनत्वमाशङ्क्याह । अपिकारादिति ।—गुणानन्दः ।

(२) दविरोधः—कलि० मु० पु० पा० ।

(३) सामान्यपदस्य जातिपरत्वे उपाधिरूपविरुद्धधर्माध्यासेन भेदो न स्यादित्यभिप्रायेण सामान्यस्येत्यत्र सामान्यपदार्थमाह । सामान्यमिति । तथा च तदा तस्यैव परामर्श इति भावः। स्वोक्तसामान्यपदार्थविवरणमित्यप्याहुः। गुणानन्दः ।

(४) तत्तद्व्यक्तित्वरूपविरुद्धधर्माध्यासो भेदासिद्ध्युपयोगी भवत्येवेत्यत आह । अयमर्थ इति ।—गुणानन्दः ।

(५) आश्रयभेदमिति । तदभावव्याप्यत्वं तद्भेदव्याप्यत्वं वा विरोधः तत्र तेन सहचारग्रहाद् ग्रहीष्यते, स च तदधिकरणीभूतव्यक्तावेवेति आश्रयभेदग्रहावश्यकत्वम् , तदभावेऽपि आश्रयभेद एवेति हृदयम् ।—गुणानन्दः ।

(६) सामान्ययोः, पृथिवीत्वजलत्वाद्योः । तदवच्छिन्नयोः, गन्धत्वस्नेहत्वाद्यवच्छिन्नयोः ग्रहीतव्य इति । साधनीयश्चाश्रयान्तरे भेदः ।—गुणानन्दः ।

(७) विरोधो गृहीतव्यः—कलि० मु० पु० पा० ।

(८) तादृशविरोधासिद्धिः—पा० २ पु० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीधितिः।

धोपयोगि, न तर्हि विरुद्धधर्माध्यासेन भेदस्य सिद्धिरिति ॥

दीधितिटिप्पणी।

तैव विशेषयोर्भेदग्रहेऽपि निर्वाहान्न तत्सामान्यावच्छिन्नयोर्विरोधाधीनं, ततो विरोधाय घटपटसामान्यस्य भेदसिद्धिर्निरर्थिकेति भावः। तच्चेदिति। सामान्यस्य विरोधज्ञानं सामान्यस्यालीकतया यदि न विरोधोपयोगीत्यर्थः। न तर्हीति। विरुद्धधर्माध्यासाधीनभेदमात्रस्यैवासिद्धिरित्यर्थः ॥

कल्पलता।

तन्तुविनाश इति। तन्तुरूपो विनाशस्तन्त्वन्तरस्य तन्तुत्वावच्छिन्नस्यैव यदि विरोधी, तदा तन्त्वन्तरं कथं भवेत्, न हि सामान्यत एवानीलविरुद्धस्वभावं नीलमनीलं भवतीत्यर्थः। द्वितीय इति। तन्तुः(१) सामान्यतो न तद्विरोधी(ति) यदि, तदा (तन्तुः) सामान्य(तः)तन्तुविरोधी कथं भवेत्, न हि नीलं नीलत्वेन कदाचिन्नीलविरोधि भवतीत्यर्थः। (ननु) न तन्तुत्वेनैव तन्तोस्तन्तुविरोधित्वं ब्रूमः, किं तु पूर्वतन्तोरुत्तरतन्तुर्विरोधीत्याचक्ष्महे इति न विरोध इति शङ्कते। विशेष एवेति सप्तमी। विशेषाश्रितो विरोधो न सामान्याश्रित इत्यर्थः(२)। अनुभयेति। सामान्यतो न विरोधी नाप्यविरोधीत्यर्थः। सामान्यतो विरोधित्वे तन्तुरेव न स्यात्, अविरोधित्वे तन्तुस्तन्तु(३)निवृत्तिरूपो न स्यादिति भावः। ननु भवतु तन्तुः सामान्यतोऽनुभयस्वभावः, किं नश्छिन्नम्, विशेषत एव विरोधान्निवृत्तिरूपता भवेदित्यत आह। ओमिति।

(१) तन्तुः—नास्ति पा० कलि० मु० पु०। (२) इत्यर्थं—कलि० मु० पु० पा०।

(३) तन्तु—कलि० मु० पु० पा०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पलता ।

अन्यतरेति । विरोधमादाय तन्तुव्यवहारानुपपत्तिरित्यविरोधपक्ष आश्रयणीयः, तथा च विनाश(१)व्यवहारानुपपत्तिरित्यर्थः । ननु सामान्यतो विरोधाविरोध(२)चिन्ता तदा भवेत्, यदि सामान्यं भवेत्, तदेव तु नास्तीत्याह । सामान्यस्येति । एवं सति गोत्वाश्वत्वलक्षणविरुद्धधर्माध्यासाभावाद्भवा(३)श्वादीनामभेद आपद्यतेत्याह । विलीनमिति । तस्य भेदस्य । तदाश्रयत्वात् तदधीनत्वादित्यर्थः ॥

दीधितिः ।

ननु(४) यथा भवतामननुगता एव तत्तत्तन्तुविनाशास्तन्तुविनाशत्वेनानुगता अनुगतं(५) तन्तुविनाशव्यवहारमर्जयन्ति, तथास्माकमपि सरूपाणि विरूपाणि च तन्तुकार्याणि तन्तुकार्यत्वेन तन्तुविनाशत्वेन(६) वा अनुगतानि(७), यथा च भवतां विशेषतो विरोधेपि(८) सामान्यतो न तथा, तथास्माकमपीत्याशयेन(९)

दीधितिटिप्पणी ।

तन्तुविनाशत्वेन वानुगतानीति । अर्जयन्तीत्यनेनानुषङ्गः । पटान्तराभावेत्यादिमूलेन विशेषतो विरोधेपि सामान्यतोऽविरोधो दर्शितः, अत्यन्ताभाववत्त्वमपि पटस्य न विरुध्यते, अतः कथं

---

(१) विनाशस्य—पुण० पु० पा० ।

(२) विरोध्यविरोधि—कलि० मु० पु० पा० । (३) भावादेवा—कलि० मु० पु० पा० ।

(४) ननु-पा० नास्ति कलि० मु० पु० । (५) अनुगत-पुण० पु० पा० ।

(६) तन्तुकार्यत्वेन ग्रहदशायामपि तथाव्यवहाराभावात् सन्तानत्वस्योक्तयुक्त्या निवेशे तस्य दुर्वचत्वाच्चोक्तम्, तन्तुविनाशत्वेनेति । तच्चालीकं वस्तु वेत्यन्यदेतत्, प्रतीतेरुभयासिद्धत्वादिति ध्येयम् ।—गुणानन्दः ।

(७) अनुगतानीत्यत्र तन्तुविनाशव्यवहारमर्जयन्तीत्यनुषज्यते ।—गुणानन्दः ।

(८) विशेषतो विरोधेऽपि, तत्पटत्वावच्छेदेन पटान्तरभेदेपि ।

(९) त्याशयेना-पुण० पु० पा० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्वतिरिक्ताभावपक्षे यथा(१) पटः पटान्तराभाववांश्च ज्जातीयश्च, अभावो वा(२) पटविरोधी पटान्तरसहवृत्ति- ति न कश्चिद्विरोधः, तथा कार्याभाव(३)पक्षेऽपि भ- विष्यतीति । नैतदेवम् । प्रतियोगिना हि तादात्म्यसंस-

दीधितिः ।

, नन्वित्यादिना । पटान्तराभाववान् पटा(४)न्तरभिन्नः(५), भावो(६) वा स्वप्रतियोगिपटविरोधी स्वाप्रतियोगिना पटेन स- न्तत्वादिवृत्तिरिति । संसर्गः एककाला(७)(व्य)वच्छेदेनैकदेश- त्वम् । ध्वंसप्रतियोगिनो(८)स्तादात्म्याद्यनभ्युपगमे क्रमेण

दीधितिटिप्पणी ।

तो विरोध इत्यत आह । पटान्तरभिन्न इति । सामा- विरोधो न बुध्यतामिति पूरणेन दर्शयति । स्वप्रतियो- । अप्रतियोगिना त्विति मूलम्, तथा च पटाभावस्य तियोगिनः पटाद्यन्तरस्य सहवृत्तित्वरूपसंसर्गित्वं न विरुध्यत भावः । एवं च तादात्म्येति एकजातीयत्वेति च दृष्टान्तार्थ केचित् । अत एव अप्रतियोगिना त्वित्यादिना संसर्गमात्र दर्शितम् । ननु तादात्म्यमेकजातीयत्वं चाभावस्यासम्मते-

(१) ननु तन्तुरेव तन्तुविनाशश्चेत्, स्वप्रतियोगिभिन्नः, भिन्नश्चेत् कथं तज्जातीय इत्यत थेति । ननु तन्तुश्चेत् तन्तुविनाशः, कथं तन्तुसहवृत्तिरत आह । अभावो वेति।

(२) तज्जातीयश्च, पटभावो वा–पा० २ पु० ।

(३) अत्र कर्मधारयः । (४) पठा–कालि० मु० पु० पा० ।

(५) अन्तरपदस्वरसादाह । पटान्तरभिन्न इति । प्रतियोग्याकाङ्क्षां निवर्त्तयन्नेकीकृत्याह । पटा- । कस्य विरोधीत्याकाङ्क्षायामाह । स्वप्रतियोगिनोऽपि पटान्तरत्वादाह । स्वाप्रतियोगिनेति । समवायसम्बन्धावच्छिन्नत्वद्योतनाय—एकतन्त्वादीति ।—गुणानन्दः ।

(६) पटाभावः, पटात्यन्ताभावः ।

(७) प्रतियोगिदेशवृत्तित्वस्य ध्वंसादेरुपगमादाह । एककालावच्छेदेनेति । इदमुपलक्षणम् । च्छेदेनैककालवृत्तित्वं चात्यन्ताभावस्य प्रतियोगिना नेष्यत इत्यपि बोध्यम् ।—गुणानन्दः ।

(८) भिन्नकालत्वादित्यग्रिमदर्शनादाह । ध्वंसप्रतियोगिनोरिति । ध्वंसत्वं च भावाभावसाधा- न प्रागभावप्रतियोगिनोरित्यपि लभ्यते ।– गुणानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गैकजातीय(१)त्वानि नेष्यन्ते, अप्रतियोगित्व
भिन्नकालत्वात्, सामान्यतो विरुद्धधर्मसंसर्गाच्च
योगिना तु(२) संसर्गे को दोषः। न हि भेद
त्वै(३)ककालताः संसर्गविरोधिन्यः, तादात्म्यं
सर्गित्वे(५) विरुद्धं विरोधित्वं च, ते च नेष्

दीधितिः।

हेतूनाह(६)। अप्रतियोगित्वेति।-सामान्यत इति(७
न्यतः आद्ये तन्तौ विसभागस्थलीयतन्तुनाशे च त
विनाशत्वयोः विरोधावधारणादित्यर्थः। भावत्वाभ
विरुद्धधर्मसंसर्गादित्यपरे। तादात्म्यं हीति। हिस्त्वर्थे
दात्म्यविरोधित्वे तु संसर्गित्वविरुद्धे इत्यर्थः। विरो

दीधितिटिप्पणी।

ऽप्रतियोगिनापि भावेन समं तादात्म्यैकजातीयत्वयोरभ
सामान्यतो विरुद्धधर्मसंसर्गाच्चेत्यत्र हेतुमाह। सामा
तन्तावित्यादि। द्रव्यत्वपृथिवीत्वयोस्तात्स्यादत आह।
ननु अप्रतियोगिभेदप्रतीतय एव सामानाधिकरण्यरूप
रोधिन्यः स्युरत आह मूले, न हीति। ते चेति मूल
योगिना समं नेष्येते इत्यर्थः। प्रतियोगिनापि एकजा
ननु यथेत्यादि। जन्यत्वेनेत्यादि यथाक्रमेणान्वयि।

(१) सम्बन्धैकजातीय-पाठः। (२) अप्रतियोगिना च-पुण० पु
(३) विजातीयतै-कलि० मु० पु० पा०।
(४) तादात्म्यं हीति। हिशब्दस्तुशब्दार्थे, संसर्गस्य भेदाधिष्ठानत्वादि
चेति। संसर्गित्वे विरुद्धमित्यनुषज्यते, विरोधस्यैकत्रासंसर्गनियमनिरूपकत्व
रथठक्कुरः। (५) संसर्गे-पुण० पु० पा०। (६) भ्युपगमे हेतून् क्रमेणा
(७) सामान्यत इति।-पा० नास्ति कलि० मु० पु०। सामान्यतः, अधिक
(८) प्रागुक्तापेक्षया वैलक्षण्यस्य वक्तव्यत्वादाह। हिस्त्विति। विरुद्धत्व
सम्बन्धं दर्शयितुमेकीकृत्याह। तादात्म्येति। संसर्गित्वविरुद्धे इति। अत्र संस
तादात्म्याविरोधितदभावव्याप्यत्वस्य विरोधित्वे आकाशादावभावादाह। सहेति।-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

STOCK VERIFY
2020
G.K.V. Library

PAYMENT PROCESSED
vide Bill No 47 Dated 28-5-14
ANIS BOOK BINDER

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

gotri

var

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar